CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 745

Title Ahnika

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 745. Subject: Dharmaśāstra

Title: Āhnika.

Author: Dave Acala. Scribe: Dave Gaṇeśaji


Date of the work: — Date of the Ms.: V.S. १९६३

Place of the work: — Place of the Ms.: —

Size: 9.2" by 4" Extent: 88 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —



ॐ श्रीगणेशाय नमः ॥ ॥ ॐ ब्रह्माणं विष्णुमीशानं गणेशं च सरस्वतीं । प्रणम्य मातापि
तरौ करोम्याह्निकदीपकं ॥१॥ विप्राणां कर्ममार्गेण ब्रह्मप्राप्तिप्रदायकं । नित्याचार
मइंद्रस्थेमदानंदपुरेवसन् ॥२॥ आद्यागमार्थं विहितश्च शास्त्रे ततश्च रा
त्रमुख्यः सर्वत्र कार्ये स्थिरतामुपेताः ज्ञाताश्च ज्ञात्या थिरवालसंज्ञाः ॥३॥ स्थिर
पंचजिनाधिकारे धुरंताज्ञाने विश्विज्ञनीनष्टवृत्ताः । कुलेऽथगुले चागिरिकृरेशा
प्रस्तनतश्च जात्या गिरिनामधेयाः ॥४॥ तेच स्वस्त्वे गिरिवन्नकेन वा ख्यामदान्प
इवात्तकामाः ये शांतिमार्गे मनुस्मृत्यज्ञात्यास्ते प्रवर्ममानाननुकासरास्ते ॥ कायेन
वाचा मनसा च येषां धर्मादपेना धिषणा न काचित् ॥५॥ हिंकारश्चाद्यः खलु यज्ञ
र्ते

मार्गे गायंति ये लोकश्चिवं वदंतः । ततस्कृते हिंगशिवाभिधानाः सर्वत्र ये सर्वजने
समर्थाः ॥६॥ खेदूष्णतां ये तु सदा वदंतस्तद् ज्ञाः खारूड नामधेयाः । हत्यस्य वृत्यै
जगतो विनेयानताद्विना कार्य प्रवृत्तिर्निवेत ॥७॥ चंडव त्रिर्मलाये स्कुलोके की
र्त्तिः प्रवर्त्तिता । सदोज्वलाचारयुताश्चंडेवास्ते तु नागराः ॥८॥ वचः स्वकीयं न वृथा
कुर्वंति महत्सु कार्येष्वपि ये समर्थाः । दानेन भोगेन धनेन शत्रुख्यास्ते वो रुष्या नागर
जाति दृष्टाः ॥९॥ सर्वत्र लोकेषु महांतश्चासन्न वदंति तज्ज्ञादि महेश्वरास्ता न महेश
भक्त्या महनीयकीर्त्तीन महोदये कर्मणि ये विधेयाः ॥१०॥ मार्मं कुमारो घ्रसमर्पयं
तो ये याच्यमाना अविलंबयंतः । वचो हिमादानममं च येषां तिमां कुडा नागरसुप्रसि

द्वाः॥११॥ मध्यमकाले तिथिर्भोजनार्थं कासारकस्त्रोलवदेवलोकौः प्राप्ते। अतिथौ वा
नुमनोरथास्ते विहल्लनालंकृतयो मडोडाना॥१२॥ तत्र धनरिंगदेवोऽत्र मडोडानां तु पू
र्वजाः॥ पुत्रास्तस्य तु चत्वारोऽनंतनामा च यः सुतः॥१३॥ लक्ष्मीधरस्ततस्तु गोविंद
स्ततदयजः॥ गोविंदवत्सराजोऽत्र दत्तो वत्सराजजः॥१४॥ द्विजानां स हि वकाया न चे
न क्रियते त्विदं। आह्निकमिति शेषः॥ वसिष्ठः सदाचारवद्भिर्भाष्यमाचारमुच्यते। आ
चारहीनं न पुनंति वेदा यद्यप्यधीताः सह षड्भिरंगैः॥ छंदांस्येनं मृत्युकाले जत्यंति
त्यजंति नीडं शकुंता इव जातपक्षाः॥३॥ पराशरः॥ चतुर्णामपि वर्णानामाचारो धर्म २
पालनं। आचारभ्रष्टदेहानां भवेद्धर्मपराङ्मुखः॥४॥ तथा। षट्कर्माणि प्रकुर्वंति

नित्यशो ये द्विजातयः॥ गृहस्था अपि मुच्यंते संसारे बंधहेतुभिः॥ षट्कर्मनिरतो
नित्यं देवतातिथिपूजकः॥ हुतशेषं तु भुंजानो ब्राह्मणो नावसीदति। स्नानं संध्या
जपश्चैव देवतानां च पूजनं॥ वैश्वदेवं तथातिथ्यं षट्कर्माणि दिने दिने॥ तथा। वे
दाभ्यासरतं शांतं पंचयज्ञक्रियापरं। न स्पृशंतीह पापानि महापातकजान्यपि॥
ब्रह्मयज्ञः॥ पितृयज्ञः॥ देवयज्ञः॥ भूतयज्ञः॥ मनुष्ययज्ञः॥ इति पंचमहायज्ञाः॥
तथा च शांखायनः॥ चत्वारः पाकयज्ञाः॥ हुतोऽहुतः प्रहुतः प्राशित इति। पाकेन नि
ष्पाद्यमानत्वात्पाकयज्ञाः॥ ब्रह्मयज्ञोऽध्ययनेन निष्पाद्यः॥ यथा। हुतोऽग्निहोत्रहो
मेन। अहुतो बलिकर्मणा। प्रहुतः पितृकर्मणा। प्राशितो ब्राह्मणे हुतः॥ अग्निहोत्र

होमो वैश्वदेवः तथा। अन्यानि षट्कर्माणि। यजन। याजन। अध्ययन। अध्याप
न। दान। प्रतिग्रह इति। तेषु याजन अध्यापन प्रतिग्रहा जीवनोपायाः उक्तानि क
र्माणि ब्राह्मणेनानुष्ठेयानि। ब्राह्मणलक्षणं। ये शांतदांताः श्रुतिपूर्णकर्णा जितेंद्रिया
प्राणिवधे निवृत्ताः प्रतिग्रहे संकुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः। आ
चारवंतनियमैस्तु गांगेयपैश्च होमैश्च विधूतपापं। आहारकाले तु तमं विभागं तं ब्रा
ह्मणं वेदविदो वदंति। शौचाचमनादिविधयः आपत्स्वपि क्रियंते अनियतकाश्चे पा ३
त्यत आह्निकव्यतिरिक्तास्ते पूर्वमभिधीयंते। मूत्रपुरीषयोः शौचे यत्नः कार्य इति। द ३
क्षः। शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः। शौचाचारविहीनस्य समस्तं कर्म

निःफलं। मृज्जलाभ्यां बाह्यं शौचं भवति। तत्र मृत्प्रमाणं। लिंगशौचे तु त्रिपर्वपूर
मात्रा। आर्द्रामलकमात्रा वा भवति। पुरीषे तु। अर्द्धप्रसृतिमात्रा यास्तत्र दर्शितः
परा। तथा। वल्मीकमूषकोत्खातं अंतर्जलं तु शुद्धपाणियुक्त इ लोष्ठखातादिका व
र्ज्याः। अन्यस्मिन्देशे या मृत सा ग्राह्या। वसिष्ठः। एका लिंगे करे तिस्र उभयोर्मृद्द्वयं
स्मृतं। मूत्रशौचे समाख्यातं शुक्रेन द्विगुणं भवेत्। पुरीषे तु। पंचापाने दशैक
स्मिन्नुभयोः सप्त मृत्तिका। दातव्यमुदकं तावन्मृदा नाशो यथा भवेत्। अविशु
द्धमना श्चेदधिकमपि कुर्यात्। तदुक्तं। गंधलेपक्षयकरं शौचं कुर्यात्प्रयत्नतः॥
स्त्रीशूद्राणां गंधलेपक्षयकरमेवा न संख्यया। एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचा

रिणा॥ त्रिगुणं स्यादनस्थानां यतीनां स्याच्चतुर्गुणं॥ तथा॥ रात्रौ कुर्यात्तदर्द्धं तु तदर्द्धं प
थि वर्त्तिनां॥ कृत्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च मृज्जलैः॥ निबद्धशिखकच्छस्तु द्विज
आचमनं चरेत्॥ कर्णस्थितोपवीतं च सत्तदाचमनं चरेत्॥ ततः स्थाने प्रतिष्ठाप्य पु
नराचम्य शुध्यति॥ इति॥ यज्ञोपवीतं कर्णे तु न्नायेति॥ पाराशरः॥ अरण्ये निर्जले रा
त्रौ चौरव्याघ्राकुले पथि॥ कृत्वा मूत्रपुरीषं तु द्रव्यहस्तो न दुष्यति॥ आचमनविधिः
पश्चाद्वक्ष्येत॥ मूत्रपुरीषोत्सर्गादिनियमः॥ तावत्॥ यज्ञोपवीतिनाभाव्यं सदा बद्ध
शिखेन च॥ विशिखो व्युपवीतश्च यत्करोति न तत्कृतं॥ शुभं कर्म इति शेषः॥ यज्ञोपवीतं ४
प्रसिद्धं॥ मस्तके दर्भब्रह्मवया ग्रंथिर्बध्यते सा शिखा॥ तथा॥ नाभौ पृष्ठे वामकक्षौ

त्रिकक्षो आश्रमेणस्मृतः॥ परिधानाद्बहिः कक्षा निषिद्धा ह्यासुरी मता॥ उभे मूत्रपुरी
षे तु दिवा कुर्यादुदङ्मुखः॥ दक्षिणाभिमुखो रात्रौ संध्ययोश्च यथा दिवा॥ कृत्वा
यज्ञोपवीतं तु पृष्ठतः कंठलंबितं॥ विण्मूत्रं तु गृही कुर्यात् यद्वा कर्णे समाहितः॥
शिरसां पृष्ठकच्छौ वा यद्विवा शिरः प्रावृत्य च॥ शांखायनगृह्ये तु॥ यज्ञोपवीतं कर्णे
कृत्वा नादित्यमभिमुखो न ज्वलनेनारुदङ्मुखो नक्तं दक्षिणामुखो न चाप्सु
ब्राह्मणं समीपे॥ कर्णे दक्षिणे॥ सव्ये शाखान्तरे॥ सोपानत्को मूत्रपुरीषं न कुर्यात्॥
तथा॥ मूत्रपुरीषयोर्मौनं कुर्यात्॥ अंगिराः॥ संध्ययोरुभयोर्जाप्ये भोजने दंतधाव
वने॥ पित्र्ये कार्ये च दैवे च तथा मूत्रपुरीषयोः॥ मौनमिति॥ न काष्ठलोष्ठेन जलेन वि

त्यांनचपर्वते।नजीर्णदेवायतनेवल्मीकेनचशाड्वले।इत्यादयःस्थाननिषे
धता।अन्यतोवगंतव्या।इतिमूत्रपुरीषयोत्सर्गविधिः॥अथआचमनश्रोत्र
वंदनविधिः।पादशौचार्थस्थापितमृत्स्नादेशमागत्यबद्धकच्छःहस्तौपादौप्र
क्षाल्याचम्यशिखांबध्वाचमनंकुर्यात्।मुक्तकच्छोनग्नश्चैनवदेदिति।तथा।शौ
चपात्रंनमोक्तव्यंशौचस्यांतेद्विजैर्नृप।अनाचांतःप्रमुचेच्चेत्तत्क्षणंरुधिराय
ते।सहितांगुलिनातोयंगृहीत्वादक्षिणेनतु।मुक्तांगुष्ठकनिष्ठाभ्यांशेषेणाच
मनंचरेत्।मास्वोन्मज्जेततन्मात्रंसंगृह्यत्रिःपिबेदपः॥आयतंपर्ववत्कृत्वागो ५
कर्णाकृतिवत्करं।करेतीर्थानि।अंगुष्ठमूलेब्राह्मं।कनिष्ठामूलेकायं।अंगुल्य

ग्रेतथादैवं।प्रदेशिनीमूलेपित्र्यं।मध्येसौम्यं।आग्नेयंच।ब्रह्मतीर्थेनाऽचमनं।
कायेनवा।प्रथमाचमनेनऋग्वेदंप्रीणाति।द्वितीयेनयजुर्वेदंप्री०।तृतीयेन
सामवेदंप्री०।आचमनानंतरंश्रोत्रवंदनं।यथा।सम्हृत्यांगुष्ठमूलेनद्विःप्रमृ
ना ज्यात्ततोष्ठौ।मुखं।संहिताभिस्त्रिभिःपूर्वमास्यमेवमुपस्पृशेत्।अंगुष्ठेनप्र
देशिन्याघ्राणंपश्चादनंतरं।अंगुष्ठाऽनामिकाभ्यांचचक्षुःश्रोत्रंपुनःपुनः।क
निष्ठांगुष्ठयोर्नाभिंहृदयंतुतलेनवै।सर्वाभिस्तुशिरःपश्चाद्बाहूचाग्रेणसंस्पृ
शेत्।वामहस्तेअपःक्षिप्त्वासर्वत्रमध्येअपस्पर्शनं।अनेनविधिनानेनआचां
तःशुचितामियात्।अत्रचापादशौचंतुतिष्ठन्मुक्तःशिखोपिवा।विनायज्ञोप

वीतेन आचांतो ह्यशुचिर्द्विजः। इति। अथ सामान्यतः आचमनविधिः। कृतोपवी
तःसश्रौसेवाश्रनः कायसंयुतः। उदङ्मुखः प्राङ्मुखो वा समासीन उपस्पृशेत्। तथा।
मधुपर्के भोजनांते संध्यादौ नित्यकर्मणि। आसनस्थः सदाचामेदन्यत्रकूर्द्धदा
सनः। तथा। दानमाचमनं होमं भोजनं देवतार्चनं। प्रौढपादो न कुर्वीत स्वाध्यायं
पितृतर्प्पणं। आसने पादमारुह्य जरूभ्यांत्वमाश्रितः। कृतावसक्थिकोयस्तुप्रौ
ढपादः स उच्यते। इत्येकंतानुगानिस्फुरद्भिश्शुद्धाः क्रमाद्द्विजा। स्त्रीशूद्रादयःशु
स्फु २ द्धाः स्नातस्पृष्टाभिरंततः। पादशौचं शिखां कच्छबद्धं स्वोपवीतकः। आचांतःशु ६
द्धिमाप्नोति तथा पूर्वोत्तरामुखः। तथा। पवित्रकरणआचामे। कुशामात्रा करोपि
दृ तृ

वा। आचमेत्त्रिःपिबेदंबु वीक्षितं इत्युक्तं। तत्रमंत्रः तदोंकारेण कर्त्तव्यं यद्वा व्या
हृतिभिर्न्निवित्। सावित्र्या वापि कर्त्तव्यं यद्वा कार्यममंत्रकं। तथा पादप्रक्षालन
शेषेण नाचामेत्। यद्वाचामेत्तत्र भोजनं संश्रावयित्वाचामेत्। तथा। येकुशा वि
धिवस्तूनाऽऽचांतेनात्तसंत्यजेत्। अन्ये दर्भास्तु संत्याज्या त्यजेद्दूर्वापुरेव
तु। स्मृत्यर्थसारे। सर्वत्राचमने तु श्रोत्रवंदनं। पूर्वोक्तं। श्रोत्रवंदनाशक्तौ त्रिःपीत्वा
हस्तौ प्रक्षाल्य मुखं प्रमृज्य खानि स्पृशेत्। आचाद्यशक्तौ त्रिःपीत्वा हस्तौ प्रक्षाल्य
दक्षिणकर्णं स्पृशेत्। अग्निरापश्च वेदाश्च सोमसूर्योनिलस्तथा। सर्वे एव तु विप्र
स्य कर्णे तिष्ठंति दक्षिणे। इति पाराशरस्मरणात्। क्षुते निष्ठीवने चैव दंतोच्छिष्टे तथा

न्हते। पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत्। श्रोत्रवंदने च फलं। यत्तु प्रथमसु
न्मार्ष्टि तेन अथर्ववेदं प्रीणाति॥ द्वितीयेन इतिहासपुराणानि। यत्पादौ अभ्युक्ष
न्नति। तेन विष्णुं। यच्छिरस्तेन ब्रह्माणं। यन्मुखं स्पृशति तेनाग्निं। यन्नासिके तेन प्रा
णं। यच्चक्षुषी तेनादित्यं। यच्छ्रोत्रे तेन दिशः। यन्नाभिं तेन पृथिवीं। यत् हृदयं ते
न सप्तऋषीन्। यन्मुखं तेन प्रजापतिं। यच्छिरस्तेन दिवं स्पृशति। पुनः पुनरिति
श्रोत्रवंदने उदकस्पर्शनार्थं। तथा। स्नात्वा पीत्वेत्यादि निष्ठीव्य सुप्त्वा क्षुत्वा हविर्न ७
क्षणे स्वाध्याये च द्विराचमेत्। तथा। भोजने हवने दाने उपहारप्रतिग्रहे। संध्या
त्रयां बुपानेषु पूर्वं पश्चाद् द्विराचमेत्। मार्जारमूषिकास्पर्शे अनृते अन्त्यजदर्शने। क

र्म कुर्वन् आचमेत्। अकर्म कुर्वन् दक्षिणं कर्णं स्पृशेत्। अथ उपवीतं। स्मृतिसा
रे। कार्पासमुपवीतं स्याद्विप्रस्येति। स्मृत्यर्थसारे। शुचौ देशे शुचिः सूत्रं संहितांगु
लिमूलके। आवेष्ट्य षण्णवत्या तत् त्रिगुणीकृत्य यत्नतः। अब्लिंगकैस्त्रिभिः सम्यक्
प्रक्षाल्योर्ध्ववृतं त्रिवृत्। अप्रदक्षिणमावर्त्य सा विन्द्या त्रिगुणीकृतं। अधःप्रदक्षि
णावृत्तं समं स्यान्नवसूत्रकं। त्रिरावेष्ट्य दृढं बध्वा हरिब्रह्मेश्वरान्नमेत्। आचारति
लके। त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधोवृतं। त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरि
ष्यते। ॐकारः प्रथमस्तंतु द्वितीयोग्निस्तथैव च। तृतीयो नागदैवत्यश्चतुर्थः सोम
एव च। पंचमः पितृदैवत्यः षष्ठश्चैव प्रजापतिः। सप्तमो वायुदैवत्यो अष्टमः सूर्य

देवता। नवमः सर्वदैवत्य इत्येतेन वर्त्तितव्यं यद्वा। पृष्ठवंशे च नाभ्यां च धृतं यद्विं
दते कटिं। तद्धार्यमुपवीतं स्यान्नातिलंबं नचोच्छ्रितं। अर्द्धनाभिमनायुष्यमधो ना
भिधनक्षयं। नाभिमात्रं प्रकुर्वीत पवित्रं कायशोधनं। ब्रह्मचारिण एकं तु गृहस्थ
स्य च तद्द्वयं। तथैव चोत्तरीयं स्याद्वस्त्राभावे तु तत्त्रयं। मंत्रपाठोपवीतं यन्नोद्ध
रेत कदाचन। मोहाद्द्विजस्तदुद्धृत्य पुनर्मंत्रेण धारयेत्। धारणमंत्राः स्वशाखो
क्ता ग्राह्याः। ब्रह्मसूत्रेण सव्येंसे स्थिते यज्ञोपवीतिना प्राचीनावीतिनान्यस्मिन् कंठ
स्थे तु निवीतिना। अन्यस्मिन् दक्षिणेंसे। बहूनि आयुःकामश्च धारयेत्सततं द्विज
ः। असुधाम्ये द्विनष्टानि गृह्णीयात्यानि मंत्रतः। क्रमः॥ ॥अथ दर्भविधिः स्मृत्यर्थ ८

सारे। कुशाः काशाः यवा दूर्वा उशीराश्च सकुंदराः। गोधूमा व्रीहयो मुंजा दश द
र्भाः सबल्वजाः। स्मृत्यर्थसारे। कुशाः काशाः शरा दूर्वा गोधूमश्च सबल्वजाः। रू
प्यं स्वर्णं तथा ताम्रं दश दर्भाः प्रकीर्त्तिताः। तथा। कुशमूले स्थितो ब्रह्मा कुशमध्ये
जनार्द्दनः। कुशाग्रे शंकरो देवस्त्रयो देवाः कुशे स्थिताः। कुशादर्भोत्पाटनमंत्रः।
विरंचिना सहोत्पन्नः परमेष्ठीनिसर्गज। नुद सर्वाणि पापानि दर्भ स्वस्तिकरो म
म। एतं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः। हुं फट्कारेण मंत्रेण उकारेण समुद्ध
रेत्। हस्ताभ्यां समुद्धरेद्दर्भान् तायेन प्रोक्षयेद्भुवि। इति स्मृत्यंतरे। अच्छिन्नाग्राश्च अ
क्षाया पित्र्ये तु हरिता उभाः। सप्त पत्राः कुशाः स्नाव हे देवे पित्र्ये च कर्मणि। वितस्तिमा

त्राकृतपाणिस्तु श्राद्धं समाचरेत्। सव्यायौ कुशौ द्वौ तु कर्त्तव्यौ दक्षिणे करे त्रयः
सव्ये च कर्त्तव्याः संध्यादिसर्वकर्मसु। कुशाभावे तु काशांश्च काशाः कुशाः समास्मृ
तां। काशाभावे गृहीतव्या अन्ये दर्भा यथाक्रमं। तथा। नभोमासस्य दर्शे तु दर्भा
ये च समाहृताः। अयातयामास्ते ज्ञेया नियोज्यास्तु पुनःपुनः। हारीतः। स्नाने दा
ने जपे होमे स्वाध्याये पितृतर्पणे। सपवित्रौ सदर्भौ वा संध्यासु च करौ तथा। नी
वीमध्ये स्थिता दर्भा ब्रह्मसूत्रे च ये धृताः। पवित्रास्तान्विजानीयाद्यथा कायस्तथा
कुशाः। यैः कृतः पिंडनिर्वापः श्राद्धं वा पितृतर्पणं। विण्मूत्रादिषु ये दर्भास्तेषां त्यागो ६
विधीयते। तथा। चतुर्भिर्दर्भपिंजूलैः कुर्याद्ब्राह्मं पवित्रकं। एकैकं न्यूनमुद्दिष्टं वर्णे

पियथाक्रमं। शंखः। ब्रह्मयज्ञे जपे होमे ब्रह्मग्रंथिर्विधीयते। भोजने वर्तुलः प्रोक्त
इति धर्मो न हीयते। न ब्रह्मग्रंथिना वामेन्न दूर्वानि कदाचन। ब्रह्मग्रंथियुतं पवित्रं
अनामिकयाऽर्द्धपर्वादधोन धारयेत्। मूलपर्वः श्रीहानिः मध्ये पर्वणि पुत्रादि
हानिः। हारीतः। समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्। तथा। दर्भाभावे
स्वर्णरूप्यताम्रैर्मयैः कर्मक्रिया सदा इति। अत्र विशेषः। दर्भौ मध्यमानामिका
भ्यां बद्धौ कोनामिकांगुलौ। द्वयोरेकं च हस्ताभ्यां संध्यादौ धारयेद्द्विजः। दर्भाः पण
कया अनामिकया न धार्याः। एकया मध्यमया च न धार्याः। किंतु। द्वाभ्यामंगु
लिभ्यां। अत्र वचनांतरं। दर्भो नासिकया धार्यो न च मध्यमयैकया। मध्यमाना

मिकाभ्यां च धार्यः संध्यादिकर्मसु॥ इति दर्भविधिः॥ ॥ अथ वस्त्रविधिः॥ धार्ये
द्वे वाससी शुक्ले धौते शांते दशान्विते। परिधानं चोत्तरीयं सर्वकर्मसु संमतं॥ वि
ष्णुपुराणे। होमे देवार्चनाद्यासु क्रियासु स्नानभोजने। नैकवस्त्रः प्रवर्तेत द्विज
श्चाचमने जपे। तथा। सन्नत्धौतं स्त्रिया धौतं शूद्रधौतं तथैव च। अधौतं तं तद्वि
जानीयाच्छुष्कं दक्षिणपश्चिमे। तथा च शातातपः॥ प्रागग्रमुदगग्रं वा धौतवस्त्रं
प्रसारयेत्। पश्चिमाग्रे दक्षिणाग्रे पुनः प्रक्षालनं विदुः॥ योगीश्वरः॥ सर्वरक्तं १०
तक्षवस्त्रं मलिनं केशदूषितं। छिन्नाग्रं चोपवस्त्रं च कुत्सितं धर्मतो विदुः॥ उप
वस्त्रं संधितं। शातातपः॥ यज्ञोपवीतवद्धार्यं द्वितीयं चोत्तरीयकं। यज्ञोपवीतव

त्कुर्याद्दैवे पित्र्ये च कर्मणि। सव्यादंसात्परिभ्रष्टं कटिदेशे प्यवस्थितं। एक
वस्त्रं तु तद्विद्याद्दैवे पित्र्ये च वर्जयेत्। पारस्करः॥ एकं चेद्वासो भवति तस्यैवो
त्तरवर्गेण प्रच्छादयतीति। जातकर्ण्यः॥ उत्तरीयवदस्याभावे चतुरंगुलं त्र्यंगु
लं घ्यंगुलं वा उत्तरीयं कुर्यात्। अन्यच्च। एकवासा जपेद्यस्तु यद्ददाति जुहोति
यत्। तत्सर्वमसुरेंद्राणां ब्रह्मा नागमकल्पयत्। अतः पट्टसूत्राजिनाकुशा
दिना उत्तरीयं कार्यं। तथा। नग्नः स्यान्मलवद्वासा नग्नः कौपीनकेवलः॥ अकच्छो 3
नुत्तरीयश्च द्विकच्छो वस्त्र एव च। नग्नस्स्यूतपटः खंडवस्त्रश्चार्द्रपटस्तथा। श्रौ
तं स्मार्तं तथा कर्म न नग्नश्चिंतयेदिति। परिधानाद्बहिः कच्छा निबद्धा ह्यासु

रीमता। अतः गुप्तकच्छेण भवितव्यं। नाभौ वामकक्षौ त्रिकच्छो ब्राह्मण इति। धा
गुप्तं। धर्मे कर्मणि गुप्तकच्छ इति। तथा। ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं।
अहतं तद्विजानीयात् सर्वकर्मसु पावनं। आसनारूढपादौ वा वस्त्रार्द्धप्रावृतो
पि वा। मुखेन धमितं भुक्त्वा द्विजश्चांद्रायणं चरेत्। इति वस्त्रार्द्धप्रावृतो भोजनं
न कुर्वीतेति। व्यक्तं। अथ शिखाबंधनविधिः। स्मृत्वोंकारं च गायत्र्या निबध्नी
याच्छिखां ततः। पुनराचम्य हृदयं बाहुस्कंधौ च संस्पृशेत्। येनाक्रांतास्त्रयो लो
का दानवाश्च वशीकृता। शरणं सर्वभूतानां समे विष्णुः प्रसीदतु। इति योगी
रः। कुत्र चित् मानस्तोक इति मंत्र उक्तः जपं हि संति विघ्नाणां रक्षाबंधविवर्जितं॥ ११

इति शिखाबंधनविधिः॥ अथ तिलकविधिः। गंगातीरमृत्तिकया गोपीचंदनेन वा
श्रीखंडादिना वा ललाटादिषु तिलकं कुर्यात्। व्यासः। आदाय परया भक्त्या गंगा
तीरमृदोद्भवां। समर्चयति गात्राणि तस्य धर्मो न हीयते। तथा। क्रियाविहीनं यदि
मंत्रहीनं श्रद्धाविहीनं यदि कालवर्जितं। स्वाललाटे यदि गोपिचंदनं प्राप्नोति तत्
कर्म सदैव चाक्षयं। ब्रह्मपुराणे। संध्या दानं जपो होमः स्वाध्यायः पितृतर्पणं। स
र्वं निःफलतां याति ऊर्द्ध्वपुंड्रं विना कृतं। तथा। ऊर्द्ध्वं च तिलकं कुर्याद्धस्तकर्णैः सुमध ब्र३ये ३
दा। निराधारास्तु गच्छंति हस्ताच्चैव त्रिपुंड्रकं। तथा। शांतिके पौष्टिके चैव वशे वेश्या
के च कर्मणि। सौरे च गणपत्ये च त्रिपुंड्रं कारयेद्द्विजः। ऊर्द्ध्वपुंड्रं च विप्रस्य ललाटे य

दिदृश्यते। पापवानपिशुद्धात्मा पूज्य एव न संशयः॥ इति ऊर्ध्वपुंड्रप्रशंसा। तथा च।
न चोर्ध्वं धारयेद्यत्तु तेन तिर्यग्गोपि चंदनं। तिर्यगूर्ध्वं च वृत्तं च धारयेच्चंदनादिकं। ति
लकं। अंगुष्ठः पुष्टिदः प्रोक्तस्तर्जनी मोक्षदायनी॥ अनामिकान्नदा प्रोक्ता मध्यमा क८३
युः करी न वै। मध्यमायशस्या प्रोक्तेति। तथा। क्रवोंतं सुरविप्राणां भ्रूमध्यं तु मुन्नो
स्मृतं। अर्द्धचंद्रं तु वैश्यानां शूद्राणां वर्तुलं स्मृतं। तथा। तिलकं पर्वमात्रेण विष्णुः प्री
तिकरं स्मृतं। विपुलं ब्रह्मणः प्रीत्यै शिवः प्रीत्यै त्रिपुंड्रकं। स्मृत्यंतरे। ललाटे दीप
कलिकां हृदये कदलीदलं। बाह्वोस्तु मत्स्यवज्ञेयं अन्यत्र बिंदुसन्निभं। तिलके श्री १२
भगवद्वचनं। ललाटे केशवं विंद्यान्नारायणमथोदरे। हृदये माधवं न्यस्य गोविं

दं कंठकूपके। विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनं। त्रिविक्रमं कर्णमूले वामे
कुक्षौ तु वामनं। श्रीधरं च हृषीकेशं वामथो बाहुकर्णयोः। पद्मनाभं पृष्ठदेशे क
कुद्दामोदरं स्मरेत्। वासुदेवं स्मरेन्मूर्ध्नि तिलकं धारयेद्द्विजः॥ एवं केशवमार्गशी
र्षादिद्वादशमासदेवतानामभिस्तिलकविधिरुक्तः॥ केचित्तु विंशति विष्णु
मूर्त्तय इति। अस्मत्पक्षे तिलकविध्यर्थ नित्यानि नामानीत्यभिदधति। यदद्य कश्च
हृत्तरन्ति त्वनयास्तत्रापक्षद्वये तिलकं कार्यमिति शौनकः॥ इति तिलकविधिः॥
अथ आसनविधिः॥ षोडशांगुलदीर्घं तु द्वादशांगुलविस्तृतं। संध्यादिकर्मविध
येशुभमासनमुच्यते। आसनस्य तु दारूणि श्रीपर्णी वर्णः शमी॥ शाल्यकर्कोडुंबरा

दीनि शुभानि कवयो विदुः॥ आदिशब्दात्स्मृत्यंतरोक्तानि ग्राह्याणि। तथा। अथ
वमा कृपाजा शंगो शाल्मलमयमेव च। लोहबद्धं तथाश्मसमासनं वर्जयेद्बुधः॥ न
स्तन्मयं न त्रिपादि शंकुव्याप्तं तथैव च। स्मृत्यर्थसारे। आसने शयने याने पादु
कादंतधावने। पालाशाश्वत्थकौ वर्ज्यौ तथा कुत्सित कर्मणि। प्रशस्ताभावे अनि
षिद्धं ग्राह्यं। प्राण्यंग कर्पासि विनीत कर्शमलि बर्बूरादि वर्ज्यं। इति आसन विधिः॥
अथ प्राणायाम विधिः॥ कर्मादौ त्रयः प्राणायामाः॥ तदुक्तं। नित्ये देवार्चने होमसं
ध्यायां श्राद्धकर्मणि। स्नाने दाने तथा ध्याने प्राणायामास्त्रयः स्मृताः॥ प्राणायामल १३
क्षणं त्वाद्दशप्रणवसंयुक्तां गायत्रीं शिरसा सह। त्रिः पठेदायतः प्राणः प्राणाया

मः स उच्यते। दशप्रणवास्त एवं। ॐ भूर्भुवः स्वः महः जनः तपः सत्यं इति सप्त
व्याहृतयः॥ याज्ञवल्क्यः॥ गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकां। प्रतिप्रणव
संयुक्तां त्रिरयं प्राणसंयमः॥ त्रिः पठेदिति शंखः॥ आपोज्योती रसोमृतं ब्रह्म भूर्भु
वः स्वरों। गायत्री शिरस् इति व्यासः॥ प्रति व्याहृति प्रणवाः इति सप्त। अष्टमो गाय
त्र्यादौ। शिरस आदौ अंते च दश। तत्र ऋषि देवत छंदांसि। एतत् ज्ञानमृते श्रौत
स्मार्तं कर्म सिद्धिर्नास्ति। यस्य वाक्यं स ऋषिः॥ या तेनोच्यते सा देवता। यदक्षरपरि
माणं तच्छंदः॥ एतदज्ञात्वा कर्म करोति स गर्ते पात्यते पापीयान्भवति इति अनुक्रम
णिका। ॐकारस्य ब्रह्माग्निर्गायत्री॥ सप्तव्याहृतीनां अनुक्रमेण ऋषि देवत छंदां
नां

सि। विश्वामित्रो जमदग्निर्भरद्वाजो गौतमो ऽत्रिर्वसिष्ठः कश्यप इति सप्त ऋषयः। अ
ग्निर्वायुः सूर्यो बृहस्पतिर्वरुण इंद्रो विश्वेदेवा देवता। गायत्र्युष्णिगनुष्टुप् बृहती
पंक्तिस्त्रिष्टुप् जगत्य इति छंदांसि। गायत्र्याः विश्वामित्रः सविता गायत्री॥ शिरसः
प्रजापतिः सविता यजुः। अत्र गायत्री त्रिपदा। क्वचिदुपस्थाने पूजायां चतुष्पदो
क्ता। प्राणायामेषु नासिकाग्रहणे प्रकारत्रयं। अंगुष्ठेन तर्जन्या च। अंगुष्ठेन अ
नामिकया च। अंगुष्ठेन कनिष्ठिकाऽनामिकाभ्यां वा। तत्र अंगुष्ठतर्जनीभ्यां स्व १५
दीसामगायनः। अंगुष्ठानामिकाभ्यां च याज्ञ्यास वैरथर्वनिः। तथा। अंगुष्ठेन पुटं या
म्येनासायां दक्षिणं पुनः। अंगुष्ठानामिकाभ्यां तु वामं घ्राणस्य संग्रहे। अनामिकाक

निष्ठा च अंगुष्ठश्च तृतीयकः। नासिकांतं निरोधेन तर्जनीमध्यमा विना। तत्र चात
र्जनीमध्यमायोगो निषिद्धो न तु केवलौ। इडा नासापुटे वामे पिंगला दक्षिणे मता।
इडा सोम्या तु नाडी स्यात् पिंगला सूर्यदेवता। सुषुम्णा मध्यदेशेऽस्या नाडीत्रय
मुदाहृतं। तथा। पूरककुंभकरेचकाः। अंतः पूरणं पूरकः। रोधनं कुंभकः। बहिर्नि
मनं रेचकः। तथा च स्मृतिः। पूरणात्पूरकः प्रोक्तः कुंभकस्तु निरोधनात्। विश्वासाद्ब
हिर्गच्छेद्रेचनं च निधीयते। तथा। नाभौ हृदि कंठे ब्रह्मविष्णुरुद्राणां स्मरणं। तथा। य
द्वदा पूरयेन्नाड्या प्राणं दक्षिणसंख्यया। तद्द्विरेचयेत्पश्चान्नाड्या चोत्तरसंख्यया। प
श्चादिति कुंभकानंतरं। अनेनैव विधानेन प्राणायामो विधीयते। स्मृत्यंतरे तु। दक्षि

णरेचयेद्वायुंवामेनापूरितोदरं।कुंभेनधारयेन्नित्यंप्राणायामंविदुर्बुधाः।मनुः।प्रा
णायामाब्राह्मणस्यत्रयोपिविधिवत्कृताः।व्याहृतिप्रणवैर्युक्ताविज्ञेयंपरमंतपः।प्रा
णायामत्रयंकार्यंसंध्यासुचतिसृष्वपि।योगीयाज्ञवल्क्यः।पूरकेविष्णुसायुज्यमिति।
मनुः।दह्यंतेध्मायमानानांधातूनांचयथामलाः।तथेंद्रियाणांदह्यंतेदोषाःप्राणस्य
संयमात्।प्राणायामैस्त्रिभिःपूतस्तत्क्षणाज्ज्वलतेग्निवत्।प्राणस्यायतनंतत्रवाच
मित्त्रयतोपिसन्।पंचलघ्वक्षरोच्चारणकालःमात्रा।पंचदशमात्रःप्राणायामः।तथा॥ १५
हीनमध्यमोत्तमभेदेनद्वादशमात्रः।चतुर्विंशतिमात्रःषट्त्रिंशन्मात्रइत्युक्तं।तथा।
सगुणोपास्ति।निर्गुणोपास्तिरितियोगविषयं।इडयाकर्षयेद्वायुंबाह्यंषोडशमा

त्रया।पूरितंधारयेद्योगीचतुःषष्ट्यातुमात्रया।सुषुम्णामध्यगंसम्यक्द्वात्रिंश
न्मात्रयाशनैः।नाड्यापिंगलयाचैनंरेचयेद्योगवित्ततः।तथा।प्राणायामैर्द्वि
दोषात्।योगीशः।प्राणायामान्नरःषष्टिंकुर्यादेवमहर्मुखे।चत्वारिंशाच्चमध्याह्ने
रा ४ संध्यायांविंशतिर्निवत्।अर्द्धमात्रेविंशतिःस्यादेवंप्राणविनिग्रहः।तथा।केवलंकुं
भकेसिद्धेरेचपूरकवर्जिते।नतस्यदुर्लभंकिंचित्त्रिषुलोकेषुविद्यते।प्राणायाम
शतंतत्रचासूर्यस्योदयनंप्रति।निर्मलास्वर्गमायांतिसंतःसुकृतिनोयथा।यदाचक्र
कृतेपापंकर्मणामनसागिरा।त्रिकालसंध्याकरणात्प्राणायामेश्चपोहति॥इतिप्रा
णायामविधिः।अथस्नानफलं।प्रातःस्नानंप्रशंसंतिदृष्टादृष्टकरंहितत्।सर्वम

इतिश्रुत्वा प्रातस्नायीन्नपादिकं। प्रातर्माध्यन्हिकं स्नानं वानप्रस्थगृहस्थयोः। य
तेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः। स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदि
तानृणां। अस्नातस्तु पुमान्नार्हो जपहोमादिकर्मसु। अत्यंतमलिनः कायो नवछिद्र
समन्वितः। स्रवत्येव दिवारात्रौ प्रातस्नानं विशोधनं। उषस्युषसि यत्स्नानं नृणाम
नुदिते रवौ। चंद्रसूर्योपरागे च प्राजापत्येन तत्समं। तथा। गुणादशस्नानपरस्य सा
ध्वेरूपं च तेजश्च बलं च शौचं। आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च तप
श्च मेधा। पाराशरः। प्रातरुत्थाय यो विप्रः प्रातःस्नायी सदा भवेत्। सर्वपापविनिर्मु १९
क्तः परं ब्रह्माधिगच्छति। तथा। स्नानं मांत्रं च पार्थिवं वायव्यं दिव्यमेव च। वारुणं मा

नसंचेति सप्तैतानि क्रमेण तु। मांत्रं आपोहिष्ठादिकैर्मंत्रैः। पार्थिवं मृदा। आग्नेयं भ
स्मना। गोरेणुना अनिलं। आतपे वृष्टिर्दिव्यं। वारुणं नद्यादौ। विष्णोध्यानेन मानसं।
वारुणव्यतिरिक्तानि कायस्यासामर्थ्यविषयाणि। सर्वेषु स्नानेषु वारुणं मुख्यं। चं
डौ। प्रातःसंक्षेपतः स्नानं शौचार्थं चेत दिष्यते। मंत्रवद्विधिनिष्णाद्यमध्यमक्रेतुस
विस्तरं। स्मृत्यर्थसारे। नित्यमेव तु मध्याह्ने प्रातश्च क्वचकस्यचित। सर्वेषापिस
न्तत्कुर्युरत्राकैचोदकं विना। स्रोतसोभिमुखः स्नायात्मार्जनं चाघमर्षणं। अ
अन्यत्रार्कमुखो रात्रौ प्राङ्मुखोग्निमुखोपि वा। स्नानं च सर्ववर्णानां कार्यमंत्रपुरः
सरं। समंत्रकं द्विजानां च स्त्रीशूद्राणाममंत्रकं। तथा। आपोहिष्ठामयं ब्राह्मं मंत्रस्ना

नंच तत्स्मृतं। पक्षोर्द्ध्वं चैवास्नकं वास्त्रमार्ज्जनं तन्मयेद्वचे। विशेषात्तु अन्यतोपिगं
तथा। शातातपः। अप्रमृज्यं नवस्त्रा तोगात्राण्यंबरपाणिभिः। नचापि धूनयेत्के
शान्वाससी नैवधूनयेत्। देवाःपिबंति शिरसो मुखस्य पितरस्तथा। वक्षसो पिच
गांधर्वा अधस्तात्सर्वजंतवः। अतोंगानि नमार्ज्जीयदिति। तथा। नग्ने शुष्कवस्त्रे
णास्थले चैवार्द्रवाससा। तर्पणाचमनं जाप्यं मार्ज्जनादिकमाचरेत्। आह्न्यस्नाने
नस्सूर्यार्घ्यं जपोस्मर्ज्जनतर्पणं। जलांबुहोमान्शुष्केण न्यूने कुर्वन दुष्यति। तथा।
जलेजलस्थोनाचामेत् जलाचांतःस्थलेशुचिः। पादौस्थाप्योभयत्रापि आचांतःशुचि ८
तामियात्। इति। अत्रविशेषमाऽविद्याश्रपादः। स्नानं स्ववात्तु सर्वव्रतपीयत्वि

त्ददेवता। नित्ये काम्ये विशेषेण कुर्यात्स्नानांगतर्पणं। नास्तिक्यभावाद्यःस्नात्वा न
तर्पयति वै पितॄन्। पिबंति देहनिस्रावं पितरोस्य जलार्थिनः। देवता अपि। अतः
स्नानांगतर्पणं कर्त्तव्यं। कचित्तस्यापवादः। अस्पर्शस्पर्शनादौ च अश्रुपाते क्षुर
नगे। स्नानं नैमित्तिकं कार्यं पित्रदेवविवर्जितं। एवं स्नानांगतर्पणं अनियतांगं।
अतःस्नातकादौ स्नाने विहितेपि स्नानांगतर्पणं न भवति॥ इति उद्देशातस्नानवि
धिः। अथ संध्यासकालः। प्रातःसंध्यां सनक्षत्रां मध्यमां स्नानकर्मणि। सादित्यांप
श्चिमां संध्यामुपासीत यथाविधि। संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। य
त्किंचित्कुरुते कर्म न तस्य फलभाग्भवेत्। यमः। संध्यामुपासते ये तु सततं शंसित

व्रताः॥ विधूतपापास्ते यांति ब्रह्मलोकं सनातनं। तथा। संध्यास्नानपरित्यागात्स्वशू
ध्रु २ द्रतां व्रजेत्। तस्मात्स्नानं च संध्यां च सूतकेपि न संत्यजेत्। संवर्त्तः। संध्यालोपेश
तज्जाघं द्वेशते द्वे च योजने। बहूदिवसिकं त्र्यं शेसोपवासोल्पो न वेत्। इत्याद्यत्र
तोज्ञेयं। स्नानं संध्याविधयोग्रे वक्ष्यंते। संध्याफलमुक्तं स्नानविशेषेत्रु। गृहेत्तु प्रा
कृतीसंध्या गोष्ठे दशगुणी भवेत्। नदीषु शतसाहस्रमनंतं शिवसंनिधौ। याज्ञव
ल्क्यः। अग्न्यागारे वनांते वा जपेद्वेदमथापि वा। तथा। अनृतं मद्यगंधं च दिवामै
थुनमेव च। पुनाति वृषलस्यान्नं संध्या बहिरुपासिता। तथा। त्रिंशत्कोट्यो महावी १८
र्या मंदेहा नाम राक्षसाः। कृतघ्ना दारुणा घोराः सूर्यमिच्छंति खादितुं। उदकांजलि

विक्षेपाद्दह्यंते ते नराक्षसाः। एतस्मात्कारणाद्विप्राः संध्यां नित्यमुपासते। न वेत्त्रैका
लिकं कर्म स्वसंध्यां तेहि जन्मनः। गायत्रीजपविधिः। प्रणवव्याहृतियुतां गायत्रीं
वेदमातरं। संध्याकाले जपेन्नित्यं ब्रह्मावाप्तिकरं परं। योगी। दशभिर्जन्मजनितं
शतेन तु पुराकृतं। त्रियुगं तु सहस्रेण गायत्री इंति किल्बिषं। तथा। वस्त्रेणाच्छाद्य
स्वकरं दक्षिणं यः सदा जपेत्। तस्य तत्सकलं जाप्यं तद्धीनमफलं स्मृतं। स्वमंत्रं च
लक्षसूत्रं च गुरोरपि न दर्शयेत्। न गायत्रीं क्षमालया। अक्षमालया गायत्रीजपो
न कार्यः। दक्षः। अनामिकायां मध्ये च मध्यमाधः क्रमेण च। तर्जन्यादिजपांते च अक्ष
मालाकरे स्थिता। अंगुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलंघने। असंख्यातं च यज्जप्तं तस्म

रु।

वीनिःफलं फवेत्।मध्यमादिद्वयं पर्वेषु पकालेषु वर्ज्जयेत्।एतन्मेरुं विजानीयाद्दू
षितं ब्रह्मणा स्वयं।न पदापदमाक्रम्य न विवेपितकं धरः॥शुचिर्न्दवान्नपंक्तयोश्च
चसंस्थावयेत्परान्।तिष्ठन्नेद्वीक्षमाणो वासीनः प्राङ्मुखोन्नपेत्।जप्य एवं द्विक
तं घ्यो एकाग्रमनसा सदा।योगी॥अष्टाविंशतिकान्नानयेत ईश्वरालयं।अष्टोत्त
रं शतंन्नस्नातारयेज्जन्मसागरात्।अस्य विरोषा गायत्र्याः अग्निर्मुखं।ब्रह्मा शिरः
।विष्णुः शरीरं।रुद्रो हृदयं।श्वेतवर्णा।सांख्यायनसगोत्रा सरस्वती जिह्वा।पिंगाक्षा
गायत्र्या न पे विनियोगः।गायत्री ध्यानं।मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखै १८
स्त्रीक्षणकैर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकां।सावित्रीं वरदाभयांकु

शगदांकुशं कपालं गणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे।अथ गाय
त्रीप्रत्यक्षरविवर्णं।तकारस्य वसिष्ठ ऋषिः।अग्निर्देवता।गायत्री छंदः।पृथिवी बी
जं।प्रह्लादा शक्तिः।सुमुखमुद्रा।पंकजमध्यस्थं पीतवर्णं ध्यावा।तकारं पादांगुष्ठयो
र्न्यसेत्।प्रमादात्कृतं पापं हरति।सकारस्य नरदा ऋषिः प्रजापतिर्देवता।पं
क्ति छंदः।आपो बीजं।प्रनाशा शक्तिः।संपुटमुद्रा।सौम्यरूपं।अतसीपुष्पवर्णः।पंकज
मध्यस्थं ध्यायेत्।सकारं गुल्फयोर्न्यसेत्।उपपातकं हरति।विकारस्य गौतम ऋषिः
।सोमो देवता।अनुष्टुप्छंदः।तेजो बीजं।नित्या शक्तिः।विततमुद्रा।शुक्लवर्णं।पं०
वा।विकारं जंघयोर्न्यसेत्।महापातकनाशनं।उकारस्य ध्रुव ऋषिः इंद्रो देवता।

त्रिष्टुप्छंदः। वायुर्बीजं। विश्वंभरा शक्तिः। विस्तीर्णमुद्रा। इंद्रनीलवर्णं। पं० वा। उ
कारं जानुनी न्यसेत। दुष्टग्रहनिवारणं। वकारस्य ब्रह्मगुरुऋषिः। आदित्यो देवता। पंक्ति
छंदः। आकाशबीजं। विलासिनी शक्तिः। एकमुखीमुद्रा। अग्निवर्णं। पं० वा। वकारं
ऊर्वोर्न्यसेत। भ्रूणहत्याकृतं पापं वकारेण प्रण०। रेकारस्य शांडिल्य ऋषिः। बृहस्प
तिर्देवता। बृहती छंदः। प्राणबीजं। प्रभा शक्तिः। द्विमुखमुद्रा। शुक्लवर्णं पं० वा। रे गु
दे न्यसेत। अगम्यागमनोद्भूतं पापं रेकारेण प्रणश्यति। णिकारस्य लोहित ऋषिः। स
विता देवता। गायत्री छंदः। आपो बीजं। यथा शक्तिः। त्रिमुखमुद्रा। विद्युद्वर्णं पं० वा॥ २०
णिं वृषणयोर्न्य०। अभक्ष्यभक्षणकृतं पापं णिका०। यंकारस्य गर्ग ऋषिः। भर्गो देवता।

कीर्तिश्छंदः। व्योमबीजं। शांता शक्तिः। चतुर्मुखमुद्रा। पंचवर्णं। पं० वा। यं कटिमध्ये
विन्यसेत। पुरुषहत्याकृतं पापं यंका०ति। नकारस्य शातातप ऋषिः। पर्जन्यो देव
ता। सत्यछंदः। उदानबीजं। कांता शक्तिः। पंचमुखीमुद्रा। ताम्रवर्णं। पं०। नं० नाभ्यां
विन्यसेत। गुरुहत्याकृतं पापं नं०। गोकारस्य सनत्कुमार ऋषिः। सरस्वत्यो देवता। प्र
जापतिछंदः। समानबीजं। दुर्गा शक्तिः। षण्मुखमुद्रा। रक्तवर्णं। पं०। गो० जठरे वि०
गोवधकृतं पापं गो०। देकारस्य स्मनुऋषिः। रुद्रो देवता। विराट् छंदः। ब्राह्मीबीजं। स
रस्वती शक्तिः। अधोमुखमुद्रा। श्यामवर्णं। पं० दे० स्तनयोर्न्य०। स्त्रीवधकृतं० देकारे
ण०। वकारस्य भार्गव ऋषिः। आदित्यो देवता पंक्तिछंदः। स्पर्शबीजं। विरूपा शक्तिः॥

यापकांजलीमुद्रा। शुक्लवर्णं पं० हृदि न्यसेत्। मनोवचोद्भवं पापं वका०। स्यकार
स्य पराशरऋषिः। श्रोत्रो देवता। विश्वं छंदः। रसबीजं। विशालाशक्तिः। शाकटमुद्रा।
पीतवर्णं। पं० स्य० कंठे वि०। मनःकृतं जनितपापं स्य०। धीकारस्य पौलस्त्यऋषिः। ऐंद्रो देव
ता। विराट् छंदः। रूपबीजं। विभूतिशक्तिः। यमपाशमुद्रा। विद्रुमवर्णं। पं०। धि० अधरे
वि०। पितृमातृकृतं पापं धिकारेण। मकारस्य क्रतुऋषिः। माहेंद्रो देवता। अक्षरपंक्ति
छंदः। गंधबीजं। विमलाशक्तिः। ग्रंथितमुद्रा। पद्मरागवर्णं पं० म० तालुमध्ये वि०॥
आजन्मकृतं पापं म०। हिकारस्य दक्षऋषिः। मित्रावरुणौ देवता। विराट्छंदः। वायुबीजं २१
। योगशक्तिः। सन्मुखोन्मुखमुद्रा। शंखवर्णं। पं०। हि नासिकाग्रे वि०। स्थावरं जंगमं पा

पं० हि०। धिकारस्य कश्यपऋषिः। विश्वेदेवा देवता। अक्षरपंक्तिछंदः। पाणिबीजं॥
नित्याशक्तिः। विलंबमुद्रा। पद्मरागवर्णं। पं०। धि०। अक्ष्णोर्वि०। प्रतिग्रहकृतं पापं
धिकारेण प्र०। योकारस्य जमदग्निऋषिः। वैश्वानरो देवता। कात्यायनी छंदः। वा
युबीजं। ज्ञानाशक्तिः। मुष्टिकमुद्रा। पद्मरागवर्णं। यो०। भ्रुवोर्मध्ये वि०। प्राणि
हत्याकृतं पापं योका० प्र०। योकारस्य मैत्रऋषिः। आदित्यो देवता। ज्योतिष्मती छं
दः। पादबीजं। रतिशक्तिः। कूर्ममुद्रा। शुक्लवर्णं। पं०। यो०। ललाटे विन्य०। दहेत्सर्वा
णि पापानि अन्येः पापैर्न लिप्यते। नकारस्य विमलऋषिः। परमात्मा देवता। दैवी
गायत्री छंदः। रूपबीजं। प्रीतिशक्तिः। वाराहीमुद्रा। पीतवर्णं। नं० पूर्वं विन्य०। सर्व

जपेन्नरः श्रेष्ठः स गच्छेद्दिरजः पदं। प्रकारस्य अंगिरा ऋषिः। कुबेरो देवता। अूं छं
दः। मनो बीजं। प्रभा जया शक्तिः। सिंहाक्रांता मुद्रा। नीलोत्पलवर्णं पं॰ प्रदक्षिणमु
खे विं॰ स न जपेन्नरः श्रेष्ठः स गच्छेद्ब्रह्मणः पदं। चोकारस्य कात्यायन ऋषिः। वा
मदेवो देवता। अनुष्टुप् छंदः। बुद्धिबीजं। पाराशरः शक्तिः। मत्स्याक्रांता मुद्रा। पीतवर्णं
पं॰ चो॰ पश्चिमे मुखे विं॰ मंत्रं॰ छ स गच्छेद्वैष्णवं पदं। दकारस्य गौतम ऋषिः। सोमो
देवता। अनुष्टुप् छंदः। अहंकार बीजं। शोभा शक्तिः। मुद्गर मुद्रा। श्यामवर्णं पं॰
उत्तरे मुखे विन्यस्य॰ प्रत्यक्षं तं द्विजोत्तमा ब्रह्मविष्णुशिवात्मकं। मोक्षं ददाति। याका
रस्य कुंभयज्ञ ऋषिः। ब्रह्मा देवता। श्री छंदः। चितिबीजं। प्रभा शक्तिः। पद्मवमुद्रा॥ २२

शुक्लवर्णं पं॰ वा। यात्रा। शिरसि विन्यसेत्। मोक्षं ददाति॥ इति गायत्र्याक्षरविपर्यसी
॥ ॐ परोरजसे सावदोम् इति गायत्र्याश्चतुर्थः पादः। पूजनविशेषेउपस्थाने च विनि
युज्यते। न जपे। इति विज्ञेयं। गायत्रीजपादुछायजपेदिति छंदोगविषयं। तेषां
गायत्रीमग्निदेवतेति। इति गायत्रीविधिः। एक एव हि लोकानां सूर्य आत्मादिक
द्धरि। सर्ववेदक्रियामूलमृषिनिर्बद्धे सदितः। सूर्य आत्मा जगतस्तस्थुषश्चेति॥
आदित्यस्य सृष्टिकर्त्ता हरिरेवं सूर्यः। सत्वस वासी वेदोक्तक्रियाणां मूलं सततं
नोपाधिनाबद्धोक्तः। कालरूपधारिणोः रहीदत्तादिरूपं नेदं क्रियोपाधिकं
दर्शयित्वं प्रथमं सर्वकर्मप्रवर्त्तायमायाकृतं न वभेदमाः। कालोहं शः क्रिया

कर्त्ता कारणं कार्यमागमः द्रव्यं फलमिति ब्रह्मन्नवधोक्तो यथा हरिः। कालः प्रात
रादिदेशः समादिः क्रियानुष्ठानं। कर्त्ता ब्राह्मणादिः करणं स्रुगादि। कार्यं यागादि।
आगमं मंत्रादि। द्रव्यं व्रीह्यादि। फलं स्वर्गादि। तत्र चक्ररूपधरो भगवान् पृ
थक् चरति मध्वादिषु मासेषु द्वादशसु भगवान् कालरूपधृक्। लोकतंत्रा
य चरति पृथग्द्वादशभिर्गणैः द्वादशभिर्मासैः प्रकृष्टैर्गणैः सह चरति
चैत्रादिषु लोकतंत्राय लोकयात्रानिर्वाहाय तानेव गणानाह। धाता कृतस्थ
ली हेतिर्वासुकी रथकृन्मुने। पुलस्त्यस्तुंबरुरिति मधुमासं नयंत्यमी। धाता सू २३
र्यः कृतस्थलाप्सरा। हेती राक्षसः वासुकि नागः रथकृद्यक्षः पुलस्त्य ऋषिः तुं

बरुर्गंधर्वः मधुमासं चैत्रं। अर्यमा पुलहोऽथौजाः प्रहेतिः पुंजिकस्थली। नार
दः कच्छनीरश्च नयंत्येते स्म माधवं। अर्यमा सूर्यः पुलह ऋषिः प्रहेती राक्षसः
पुंजिकस्थली अप्सरा। नारदो गंधर्वः कच्छनीरो नागः अथौजा नाम यक्षः मा
धवं वैशाखं। मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहा। रथस्वन इति ह्येते शु
क्रमासं नयंत्यमी। मित्रः सूर्यः अत्रिऋषिः पौरुषेयो राक्षसः रथस्वनो यक्षः
तक्षको नागः तक्षको नागः मेनका अप्सरा। हहा गंधर्वः शुक्रं मासं ज्येष्ठं न
यंत्यनुवर्त्तयति। वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहुः। शुक्रं चित्रस्वनश्चै
व शुचिर्मासं नयंत्यमी। वरुणः सूर्यः वसिष्ठ ऋषिः रंभा अप्सरा। सहजन्योय

क्षः। हूहूर्गंधर्वः। शुक्रो नागः। चित्रस्वनो राक्षसः। शुचिमासमाषाढं। इंद्रो विश्वा
वसुः श्रोता। एलापत्रस्तथा गिराः। प्रम्लोचा राक्षसश्च ये नभोमासं नयंत्यमी॥ इं
द्रः सूर्यः। अंगिरा ऋषिः। विश्वावसुर्गंधर्वः। श्रोता यक्षः। एलापुत्रो नागः। वर्योरा
क्षसः। प्रम्लोचा अप्सरा। नभो मासं श्रावणं। विवस्वानुग्रसेनश्च व्याघ्र आसार
णो भृगुः। अनुम्लोचा शंखपालेन नभस्याख्यं नयंत्यमी॥ विवस्वान्सूर्यः। भृगुऋ
षिः। उग्रसेनो गंधर्वः। व्याघ्रो राक्षसः। आसारणो यक्षः। अनुम्लोचा अप्सरा। शं
खपालो नागः। नभस्याख्यं भाद्रपदं। त्वष्टा नीकतनयः कंबलश्च तिलोत्तमा। ब्र २५
ह्मापेतो थ शतजित धृतराष्ट्र इषंभरा। त्वष्टा सूर्यः। ऋचीकतनयो जमदग्निऋषिः

कंबलाश्वो नागः। तिलोत्तमा अप्सरा। ब्रह्मापेतो राक्षसः। शतजिद्यक्षः। धृतरा
ष्ट्रो गंधर्वः। इषंभराः आश्विनपावकाः। विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजि
त्। विश्वामित्रो मखापेतो ऊर्जमासं नयंत्यमी॥ विष्णुरादित्यः। विश्वामित्र ऋषिः
। अश्वतरो नागः। रंभा अप्सरा। सूर्यवर्चा गंधर्वः। सत्यजिद्यक्षः। मखापेतो राक्ष
सः। ऊर्जमासं कार्त्तिकं। अथांशुः कश्यपस्तार्क्ष्य ऋतसेनस्तथोर्वशी। विद्युच्छ
त्रुर्महाशंखः सहोमासं नयंत्यमी॥ अंशुः सूर्यः। कश्यप ऋषिः। तार्क्ष्यो यक्षः। ऋ
तसेनो गंधर्वः। उर्वशी अप्सरा। विद्युच्छत्रू राक्षसः। महाशंखो नागः। सहोमा
सं मार्गशीर्षं। भगः स्फूर्जोरिष्टनेमिरूर्ण आयुश्च पंचमः। कर्कोटक पूर्वचित्तिश्च

पुष्यमासं नयंत्यमी॥ भगः सूर्यः आयुऋषिः ऊर्ज्जोरिराक्षसः अरिष्टनेमिर्गंधर्वः ऊ
र्णोयक्षः कर्कोटको नागः पूर्वचित्तिः अप्सरा। पुष्यः पौरवं। पूषा धनंजयो। वातः
सुषेणः सुरुचिस्तथा। घृताची गौतमश्चैव तपोमासं नयंत्यमी॥ पूषा सूर्यः गौतम
ऋषिः धनंजयो नागः वातो राक्षसः सुषेणो गंधर्वः सुरुचिर्यक्षः घृताची अ
प्सरा। तपोमासं माघं। क्रतुर्वर्चा भरद्वाजः पर्जन्यः सेनजित्तथा। विश्व ऐरावत
श्चैव तपस्याख्यं नयंत्यमी॥ पर्जन्यः सूर्यः भरद्वाज ऋषिः क्रतुर्यक्षः वर्चाराक्षसः
सेनजिदप्सरा। विश्वो गंधर्वः ऐरावतो नागः तपस्याख्यं फाल्गुनं। एते चादित्या २५
दयः एता भगवतो विष्णोरादित्यस्य विभूतयः स्मरतां संध्ययोर्नृणां हरंत्येनो दि

स्वा

नेदिने। एतेषां पृथक्कर्माणि निरूपयंति। द्वादशस्वपि मासेषु देवोसौ षड्भिरस्य
ते। चरन्समंतात्तनुते परत्रेह च सन्मतिं। असौ देवः सूर्यः षड्भिर्गंधर्वादिभि अस्य
जनस्य समंताच्चरन् शुभां गतिं तनुते। गायत्र्यर्थो निरूपितः इति। अथ प्रातःस्नान
नाक्तस्य संध्याविधिः उष्णोदकेन शीतोदकेन पारक्योदकेन वा कंठस्नानं। गोनि
लः कंठस्नानं स्नानमाहुः चक्षुरोगी शिरोरोगी कंठरोगी कफाधिकः कंठस्नानं
प्रकुर्वीत शिरस्नानसमं हितं। आर्द्रवाससा वा शरीरं प्रमृज्यात्। आपोहिष्ठा
दिनिमार्ज्जनं आह्नं परासरश्च। आमणिबंधं हस्तौ आजानुतः पादौ प्रक्षाल्य वि
धिवदाचम्य शुचिर्भवति। यतः याकाले वंदिता संध्या सा संध्या फलदायिनी। अ

कालेवंदितासंध्यासंध्यावंध्यावधूरिव। अहतंवाससिल्लिकंच। तथा। संध्यात्रये
पिकर्तव्यौसपवित्रौकरौद्विजैः। इतिदर्भापाणिर्वाकालेसंध्योपासनं। तथा। द
र्भहीनानिःफलाः। दर्भहीनाश्चयासंध्यातिलहीनंचतर्पणं। दानंचदक्षिणाहीनं
तत्सर्वंनिःफलंभवेत्। तथा। अनुदितादित्येसंध्योपास्तिपरोभवेत्। उदितेसति
यासंध्याबालक्रीडोपमाहिसा। प्रातःसंध्यांसनक्षत्रांमध्यमांस्नानकर्मणि। सा
दित्यांपश्चिमांसंध्यामुपासीतयथाविधि। प्रातःसूर्यदर्शनंयावत्। सायंनक्षत्रद
र्शनंयावत्कालः। तथा। आदित्येऽस्तमितेचास्तेसंध्योपास्तिमकुर्वतां। स्नाचाचाराणांसि २९
राचम्यगायत्र्याष्टशतंजपेत्। संध्याकालेव्यतिक्रांतेपुनर्नामिच्छ्यंचंजपेत्। ऋचंवावं

र्चंजप्त्वासंध्योपास्तिर्भवेत्ततः। अथदंतधावनविधिः। मुखेपर्युषितेनित्यंभवे
८२ त्यप्रयतोनरः। तस्मात्सर्वप्रयत्नेनभक्षयेद्दंतधावनं। प्राङ्मुखोदङ्मुखोवावा
ग्यतोदंतधावनं। कुर्यात्। कंटकीक्षीरवृक्षोत्थंद्वादशांगुलप्रमाणं। कनिष्ठिका
यवत्स्थूलंपर्वार्द्धकृतकूर्चकं। खादिरश्चकरंजश्चकदंबश्चवटस्तथा। अपाम
४ खद गेउडुंबरीसुगंधिकटुकखायेत्यादिप्रशस्तं। नद्यादरिष्टपालाशंबकुलंश्लेष स४
पीलुजं। लेष्मांतकनिर्गुंडीशमीतिंदुकशिग्रुजं। कोविदारगुदाश्वत्थशाल्मली
अश्मिकर्कअर्हदग्धस्तिविनीतक। निषिद्धरहितंम्याद्यं। गर्गः। द्वादशांगुलंत्रवि
प्राणांक्षत्रियाणांनवांगुलं। अष्टांगुलंत्ववैश्यानांशूद्राणांसप्तसंमितं। चतुरंगुलं

तुनारीणांसर्वेषांवासमंनवेत्॥ दंतधावनमंत्रः॥ आयुर्बलंयशोवर्चः प्रजाःपशुव
सूनिच। ब्रह्मप्रज्ञांचमेधांचत्वंनोधेहिवनस्पते॥ जिह्वोल्लेखनञ्चापिप्रक्षाल्यमं
त्का३ त्वात्यजेत्॥ नब्रह्मचारिणःदंतधावनं। अलाभेदंतकाष्ठानांनिषिद्धायांतथाति
थौ। अपांद्वादशगंडूषैर्मुखशुद्धिर्भवेन्नृणां॥ स्मृत्यर्थसारे। तृणपर्णोदकैःप्रदे
शिनीवर्ज्जं। अंगुल्यावादंतान्संशोध्यपश्चाज्जिह्वोल्लेखनं। पूर्ववदाचमनं। प्रतिप
द्दर्शषष्ठीषुनवम्येकादशीषुच। व्यतीपातेचउद्देन्यांसंक्रांतौरविवासरे॥ श्राद्धेउ
पवासव्रतेनित्यकर्मनिवृत्तेनेत्यादि। दंतधावनंनकुर्यात्। यच्चस्नानकालेदंत २२
धावनंनिषेधवचनं। तन्मध्यमकस्नानविषयं। इतिदंतधावनविधिः॥ ६॥ वेदात्मा

गरविप्रमुखतिलकः श्रीवत्सराजोयणीन्नृणाभाग्यवतीचपुत्रमचलंसूतेस्मदि
ह्यास्त्रियं। तेनाथक्रियतेयमाह्निकविधिः सद्भूसुराणांस्तुतेसन्मार्गस्यपदंसदा
निलिखतांध्वांतेयथादीपकः॥ अत्रचलेनहिविदनमडोडेनाग्निशिचिणा॥ शौचा
दिविधयःप्रोक्ताआह्निकस्योपयोगिकाः। स्वशाखाविहितस्मार्तकर्मानुष्ठानक्र
मविषयवर्णोपयोगीषट्कर्माणिशौचाचमनोपवीतदर्भवस्त्रशिखाबंधनतिलका
सनप्राणायामस्नानसंध्यान्यपस्नानाद्यर्कसंध्यावंदनविधिः॥ अथआह्निकं।
नदिवाध्यायीतनपूर्वापररात्रावितिशांखायनः॥ पूर्वापरौयामौविद्यपनयेदिति
स्मृत्यर्थसारे। उत्थायप्रातराचम्येति। प्रातरितिप्रातःकालीनंकर्मसमीपमागत

मितिज्ञात्वोत्थाय आचम्य शुचिर्भूत्वा मातापितरौ पादौ नमस्कृत्य इष्टदेवतां च तद
नुज्ञया धर्मक्रियां वेदाध्ययनं कुर्यात्। आचारतिलके। चतस्रो घटिकाः प्रातरु
णोदयस्तु च्यते। मुनीनां स्नानकालोयं गंगास्नानसमो हि सः। आलस्यं सुकृतं मध्येत
ता तथा। आलस्ये सुकृते उत्थाय चिंतयेदात्मनो हितं। तस्य ध्यानं प्रकुर्वीत दीपवद्यो
हृदि स्थितः। प्रातः स्मरामि भवभीतिमहार्त्तिशांत्यै नारायणं गरुडवाहनमंजनाभं।
ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रं॥१॥ प्रातर्नमा
मि मनसा वचसा च मूर्ध्ना पादारविंदयुगलं परमस्य पुंसः। नारायणस्य नरकार्ण २८
वतारणस्य पारायणप्रवरविप्रपरायणस्य॥२॥ प्रातर्भजामि भजतामभयंकरं तं

प्राक्सर्वजन्मकृतपापभयापहत्यै। यो ग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणा
शमकरो धृतशंखचक्रः॥३॥ श्लोकत्रयमिदं पुण्यं प्रातरुत्थाय यः पठेत्। लोकत्र
यगुरुस्तस्मै दद्यादात्मपदं हरिः॥४॥ श्रयतां राक्षसः श्रेष्ठः सुप्रभातं हरोदितं। श्रु
त्वा स्मृत्वा पठित्वा च सर्वपापैः प्रमुच्यते॥५॥ तथा। ब्रह्मा मुरारिस्त्रिपुरांतकारि
भानुः शशी भूमिसुतो बुधश्च। गुरुश्च शुक्रः शनिराहुकेतवः कुर्वंतु सर्वे मम सुप्र
२३ भातं॥१॥ भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुलस्त्यः पुलहः सगौतमः। रैभ्यो मरीचि
श्च्यवनो निषंगः कु०॥२॥ सनत्कुमारश्च सनंदनश्च सनातनोप्यासुरिसंज्ञै यौ च॥ [illegible]
सप्तस्वराः सप्त रसातलानि कु०॥३॥ सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपव

नानिसप्त।भृगुरादिरुत्वाचुवनानिसप्तकु॥४॥पृथ्वीसगंधाःसरसास्तथापस्पर्शी
सवायुर्ज्वलिनःसतेजाः।नभःसशद्बंमहतासहैवकुर्वं॥५॥इत्थंप्रभातेपरमं
पवित्रंपठेत्स्मरेद्वाशृणुयाच्चभक्त्या।दुःस्वप्ननाशोनघसुप्रभातेनवेच्चसर्वेभ
गवत्प्रसादात॥६॥अग्निंत्रयंत्रीणिचपुष्कराणिरामत्रयंत्रीणिपदानिविष्णोः।रु
द्रत्रिनेत्रंत्रिपथाचगंगाएतानिदुःस्वप्नविनाशनानि।इत्यादिमांगल्यंपठनी
यं।उषःकालेतुसंप्राप्तेशौचंकृत्वायथार्थवत्।ततःस्नानंप्रकुर्वीतदंतधावनपू
र्वकं।शौचदंतधावनविधिरुक्तःपूर्वंतथा।अत्यंतमलिनःकायोनवछिद्रसम २९
न्वितः।स्रवत्येवदिवारात्रौप्रातःस्नानंविशोधनं।प्रातःसंक्षेपतःस्नानंसंध्याहोम

र्थसिद्धये।जलाशयाभावे।आपःस्वभावतोमेध्याःकिंपुनर्वह्नितापिताः।अतः
संतःप्रशंसंतिस्नानमुष्णेनवारिणा।अन्यत्रनद्यादौतु।अशाघ्यस्नानस्थानंतु
विण्मूत्रंनैवकारयेत्।अंतरेयदिकुर्वीतपितृघातीसउच्यते।तथा।स्नानार्थम
भिगच्छंतंदेवाःपितृगणैःसह।वायुभूतास्तुगच्छंतितृषार्त्ताःसलिलार्थिनः।तीर्थे
गत्वातटंप्रक्षाल्यदर्भानदीक्षयाचम्यसाविचीनस्पृच्चाशिखांबध्वादर्भपाणि
र्जलंनत्वा।पादौहस्तौमुखंप्रक्षाल्यहस्तीमिवावगाडेतयावक्ष्यादश्चुचिः।कलिक
ल्पादौनिमज्ज्यस्नात्वातटेउपविश्याचमनं।विमदोग्निर्विराट्।नइंनोअपिवातय
मनइतिचिजप्तमुदकंपिबेत्ततःप्रयोगस्नानं।आपोहिष्ठेतिरिमंमेगंगेय

मुने इति मार्जयित्वा। अघमर्षणं चरित्वा आपो अस्मानिति उदके निमज्य त्रिर्जपं
च्च वा। तत उपविश्याचम्य स्नानांगतर्पणं समासतः संध्यन्होमार्थं। तर्पणमत्र
वाजस्नान्निर्गतस्य पुंसो दइनिःस्रावं तृषार्त्ताः पितरो देवाश्च पिबंति। अतः स्वशा
खाविहितं स्नानांगतर्पणं कर्त्तव्यं। यथा। स्नानांगतर्पणं पूर्वं अष्टौ वसव इति स्मृ
त्यंतरे। ध्रुवो धरश्च सोमः आपः अनिलः अनलः प्रत्यूषः प्रभासः। एते अष्टौ व
सवः सर्वत्रोभाभ्यां हस्ताभ्यां दर्भपवित्रकौ दनौ वा धरणीयौ। दर्भान्तृष्णी वा॥
ध्रुवस्तृप्यतु। धरस्तृप्यतु। एवं अष्टभ्यः जलं वकायस्वाहा। अभ्यादयो देवतास्तृ ३०
प्यंतु। पृथिव्यादिन्दतानि तृप्यंतु। इति सव्येन। अथ दक्षिणामुखः अपसव्येन।

तानदर्भान्द्विगुणीकृत्य। शतर्चिनादयत्रषयस्तृप्यंतु। सुमंत्वादय आचार्याः।
पित्र्यादि पितृवंश्याः। मातामहादि मातृवंश्याः। ततो नीवीतिकंठे। वामांगुष्ठमुलेद
र्भमूलं तत्र वा। सनकादयो मनुष्यास्तृप्यंतु। सनकः सनंदनः सनातनः कपिलः आ
सुरिः वोढुः पंचशिखः सप्त सनकादयो मनुष्याः। ततः सव्येन। आब्रह्मस्तंबपर्यं
तं जगत्तृप्यतु। इति च वदन्। जलांजलिं चयं दद्यात्। जलांजलिरुच्चैः क्षिपेत्। जलां
जलीस्तत्तो दद्यादन्तुये च ये पिस्मन्कृता। असंस्कृतप्रमीता नामे कर्म वत्तदे क्षिपे
त्। अंजलिविशेषो मध्यक्स्नानेव स्नात। तत आचम्य संभवे सति धौतवासः सीध
वास्नानवस्त्रं निःपीड्याचम्यसनद्वत्र्वो प्रातः संध्यामुपासीत। पराशरः। ब्राह्म्यः श्रा

ऽक्छिद्रिणांतुसंगमस्नानयोनवेत्।मध्यमक्तिकायांसंध्यायांसर्वोदवसमागमः।य
था।यासंध्यासातुगायत्रीत्रिधानत्वाद्यवस्थिता।पूर्वानिवतिगायत्रीसावित्रीम
ध्यमास्मृता।यानवेत्यश्चिमासंध्यासातुदेवीसरस्वती।तथाविशेषः।आपोहिष्ठे
तिसूक्तेनदर्भैर्मार्जनमाचरेत्।नद्यांतीर्थेकदेवापिजलेपूर्णेथभाजने।अंदुंब
रस्थसौवर्णैरजतेदारुसंभवे।स्त्वाथवामहस्तेवासंध्योपास्तिसमाचरेत्।धारा
च्युतेनतोयेनमार्जनंस्याद्विगर्हितं।वेदावरंचसंस्पृष्टाआपोन्भूमौनपातयेत्॥
तथा।मंत्रांतेमार्जनंकुर्यात्पादस्यांतेथवापुनः।ऋचस्यांतेथवाकुर्याद्दर्षीणांमत ३१
मीदृशं।कात्यायनीखंडे।भूमौशिरसिचाकाशआकाशेन्भूमिमस्तके।मस्तकेचतथा

काशेभूमौचनवृधाक्षिपेत्।भूमिश्राष्टेनचरणौ।आकाशंहृदयं।शिरस्येवाशि
रःशाष्टः।यस्यवर्तयेतिभूमावेव॥नतुशिरसि॥ ॥अथसंध्याकर्मप्रवक्ष्यामिविप्रा
णांहितकाम्यया।प्रणवेव्याहृतगन्यासोनाभिहृन्मूर्द्धसुक्रमात्।अपवित्रइदंविष्णुः
पृथिवीतियथाक्रमं।मंत्रत्रयंप्रयोक्तव्यंस्मृतौमार्जनमासनं।अंगुष्ठादिषुविन्यासो
गोविंदादिकनामभिः।आकृतिभिश्वगायत्र्यान्यासःपादादिषुक्रमात्।प्राणायामत्रयं
कृत्वामंत्रेणाचमनंततः।संध्याध्यानंचगायत्र्याआपोहिष्ठेतिमार्जनं।नासिकास्पृष्टज
लक्षत्रयंविक्षिप्यमंत्रतः।गायत्र्यांजलिविक्षेपाःसूर्याभिमुखतस्त्रयः।मंत्रैःसूर्यमुपस्था
नंततःसंध्याविसर्जनं।संध्याकर्मचनिर्दिष्टंविप्राणांराजसूयवत्।अहोरात्रयोःसंधौ

या। क्रियाचविधीयते। यासंध्यासंध्येतिकर्मनामधेयं। इ॰मंत्राणांब्राह्मणार्षेयछंदोदै
वतविद्यास्नाध्यापनाभ्यांश्रेयोधिगच्छति। इत्यादिस्मनुक्रमणिका। उक्तंचप्राक्ब्राण
यामप्रकरणे॥ ॥अथसंध्याविधिः॥ ॥विधिवदाचम्यादिशाकाशौसंकीर्त्यसर्वपा ॐकारम
पक्षयार्थंप्रातःसंध्यामुपास्ये॥ ॥नःतःऋग्वेदायनमः॥ श्रीसूर्यायनमः॥ ॥ॐकारस्य इति ३
ब्रह्माग्निर्गायत्री। प्रातःसंध्याकर्मारंभेविनियोगः। ॐ अकारायनमोनाभौ। उकारायनम :
हृदये। मकारायनमःशिरसि॥ ॐविष्णुः ३ ॐहरिः ३। ॐनमोभगवतेश्रीवासुदेवाय। अपवि

त्र्यक्षरेब्रह्मवादिनी॥ गायत्रीछंदसांमाताब्रह्मणासह आवह। आयाहिवर
देदेवित्र्यक्षरेब्रह्मनिर्मिते। गायत्रीछंदसांमातब्रह्मयोनिनमोस्तुते। ततो
मार्ज्जनं। ब्रह्माप्रजापतिः। ॐभूर्भुवःस्वः। विश्वामित्रःसविता गायत्री। मार्ज्जने
विनियोगः। नमःसवितुः॰ऋ॰१। सिंधुद्वीपआपोगायत्री॥ आपोहिष्ठेतिपंचमीवर्द्ध
मानासप्तमीप्रतिष्ठाअंतेद्वेनुष्टुभौदशमीच। मार्ज्जनेवि॰। आपोहिष्ठेतित्या
द्यत्वचस्यपूर्वंपच्छेनपच्छांतेपुनः अर्द्धर्चान्तेपुनः ऋगंतेमार्ज्जनं। सूक्तेनशि
रस्युदकप्रक्षेपः। यस्यक्षयायजिन्वथेतिविप्रुषोन्क्षमोनत्र्यवारसि। अयंवि
शेषमार्ज्जनविधिःकाशीखंडेस्मृतिसारेचंडुनिबंधेचप्रतिपादितः। आपोहिष्ठे

तिशाश्वतं सर्वसिंमतं। जलपूर्णे ततो हस्ते नासिकां स्वां निमज्जयेत्। ऋतं चेति प
ठित्वा तु तज्जलं तु क्षितौ क्षिपेत्। अघमर्षणो नाव ऋषिर्नोनुष्टुप्। उदकप्रक्षेपे वि
नियोगः। ऋतं च सत्यं०। ३। सप्रणवाः सप्तव्याहृतीर्जपेत्। सर्वपर्वसु व्यसेच्च। वा
मदेव आपो यजुः। उदकप्रक्षेपे०। आपः पचति भूतानि युहायां पुरुषोत्तमः। अ
नेन मंत्रेण नासिकाग्रस्पृष्टचुलुकप्रक्षेपः। त्वं यज्ञः। त्वं ब्रह्मा। त्वं विष्णुः। त्
वं रुद्रः। त्वं वषट्कारः। आपो ज्योतीति प्रजापतिर्ब्रह्माग्निर्वायुः सूर्यो यजुः। उद
कप्रक्षेपे०। ततउच्छाय तिष्ठन् गायत्र्या जलपूर्णांजलिप्रक्षेपः। उच्चैः क्षिपेत्। यथा ३५
बिंदवो वज्रीनष्टचानि पातंति दैत्यापि शमनोर्थं दैत्यामंदेहाउदययुक्ताः। प्रद

क्षिणमावर्त्तेत। कराभ्यां तोयमादाय गायत्र्या चाभिमंत्रितं। आदित्याभिमुखस्ति
ष्ठन् त्रिः क्षिपेत्संध्ययोर्द्वयोः। मध्याह्ने सकृदंजलिः। अथ सूर्योपस्थानं विधिः॥
स्मृतिसारे। स्त्रचोत्तानौ करौ प्रातःसायं चाभिमुखौ तथा। मध्याह्ने चोर्द्ध हस्ताभ्या
मुपस्थाने विधिः स्मृतः। यच्च हस्ताभ्यां स्वस्तिकं च चाउपतिष्ठेद्दिवाकरं। तदभ्यशा
खायां। उदुत्यमिति प्रस्कण्वः सूर्यः नवाद्यागायत्र्योंत्यस्त्रचोरोगप्रउपनिषत्। अंत्योर्द्वी
र्चः ग्राउष्टुभः। तच्चक्षुर्वसिष्ठः सूर्यः पुरउष्णिक्। सविता पश्चातात्त्रनुष्टुभः सविता त्रि
ष्टुप्। सूर्योपस्थाने विनियोगः। उदुत्यमित्युपस्थानं। ततो गायत्रीजपस्तिष्ठन्। ति
ष्ठन्नेवोदयात्प्राणान्जपेद्व्याहृतिपूर्वकं। आसीनः प्राक्सायंतु वह्निकार्यंततः पु

नः। प्रातर्नाभौ करौ न्यस्त्वा मध्यन्हे हृदयस्थितौ। सायं मुखसमीपे तु एष न्यासो विधि
स्मृतः। ततः संध्यनविविसर्जनं। यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्। तत्सर्वं क्षम्य
तां देवि कस्य न स्खलते मनः। उत्तरे शिखरे जाता भूम्यां पर्वतवासिनि। ब्रह्मणास
मनुज्ञाता गच्छ देवि नमोऽस्तु ते। इति चंडुप्रोक्तं। प्रातः प्राङ्मुखस्तिष्ठन्ना मंडलदर्शि
नात् गायत्रीं जपेदिति तु ब्रह्मचार्यनुदितहोमिनां। तस्मादनुदिते होतव्यमिति
कौषीतकिः। ततो होमानुरोधेन गायत्रीजपः। ॐकारं पूर्वमुच्चार्य भूर्भुवःस्वस्तथै
व च। गायत्रीं प्रणवश्चांते जप एवमुदाहृतः। अग्निपुराणे। गृहस्थो ब्रह्मचारी च प्र ३६
णवाद्यामिमां जपेत्। अंते यः प्रणवं कुर्यान्नासौ सिद्धिमवाप्नुयात्। इति अंत्यं प्रण

वं निषिद्धं गृहस्थस्य गायत्र्या आदौ प्रणव इति प्रणवद्वययुतेति स्थापिता। तथा।
ध्यायेच्च मनसा मंत्रं जिह्वोष्ठौ न च चालयेत्। इत्यादि जपविधिः। गायत्रीजपप्रक
रणे निरूपितः। अन्योऽप्यधिको वापि यः स्वशाखोक्तो विधिः। तेन संतनुयाद्यज्ञं न कु
र्यात्पारशाखिकं। संध्याकर्मावसाने तु स्वयं होमो विधीयते। स्वयं होमे तु यत्पुण्यं
न तदन्येन जायते। अयं होमकालः। अथोक्तविधिना अग्निहोत्रं जुहोति। प्रातःपु
रोदयादपरेतेतमसि तस्मिन् काले जुहुयादिति शांखायनसूत्रं। अग्निहोत्रं जुहो
ति सायं च प्रातश्च पुराछायानां संसर्गादिति शांखायनेन स्वसूत्रे प्रतिपादितः। तत
स्मार्तोऽग्निहोत्राद्यो होमः। तस्य प्रादुष्करणहवनकालावग्निहोत्रेण व्याख्याताविति गृ

रव्यं। परिसमूहनं। पाणिनासोदकेन त्रिः प्रमार्जितं समूहनं। सत्यं त्वर्तेन परिषिं
चामीति त्रिः अनेन पर्युक्षणं। समिधमाधयास्य यायिम्वा ॐ प्रजापतये स्वाहा।
न मम इति सर्वत्र। ब्रीहियवतंडुलानामन्यतमद्धविरित्याद्युक्तं। उपरिष्टात्समि
धमाधानं पर्युक्षणं च। फलमिति श्रुतिः। गजाश्वरथदानानि हेमभारशतानि
चागवां कोटिप्रदानेन तुल्यानि प्रातराहुतेः। इति। अथ प्रातर्जपः। अहरहः स्वा
ध्यायमधीयीत। अद्या नो देव सवितरित्यादिकः। श्यावाश्वः सविता गायत्री। अद्या
नो देव सवितः ऋ २ भूचेतालिंगोक्तदेवता अनुष्टुप्। दुःस्वप्नघ्नं पक्ष्यंतं त्रिष्टुम्म ३७
ध्यं। अपेहि मनसस्पत ऋ ५ अघमर्षणो भाववृत्तोनुष्टुप्। ऋतं च सत्यं ऋ ३। त्रि

त आदिमग्रा पंक्तयः तिस्रोंत्याउषस्यः। आदित्या अवहि रयत। ऋ ८। गृत्समदै
इंद्रस्त्रिष्टुप्। इंद्र श्रेष्ठानि। १। वामदेवः सूर्यो जगती। हंसः शुचिषत्। १। शुनः शे
पो विश्वेदेवास्त्रिष्टुप्। नमो महद्भ्यो। १। कुर्गः इंद्रो बृहती। यत इंद्र भयामहे। १। क
क्षीवान अश्विनो गायत्री। अथ स्वस्त्ययनस्य। १। कूर्मो विरुणस्त्रिष्टुप्। यो मे राजन् ऋ १
विड्ढो विश्वेदेवास्त्रिष्टुप्। जगत्यंतं। ममाग्ने वर्चो ऋ १०। स्वस्त्यात्रेयो विश्वेदेवा
जगती त्रिष्टुप्। अंत्ये अनुष्टुभौ अंत्ये द्वे विराट्त्रिष्टुभौ। स्वस्ति नो मिमीतां ऋ ७
विमदो अग्निर्विराट्। भद्रं नो अपि वातय मनः। उत सत्र इति प्रातर्जपः। उतस्मादि
नि निदेशो ब्रह्मणस्त्रिविधस्मृतः। उतस्मादिति सर्वत्र जपादिषु प्रयोज्यं। अथ गा

यश्चाश्चादावसानेच प्रणवसंयुक्तयास्वाहुतिकयागायत्र्याउच्चारणं। यथा॥
ॐभूर्भुवःस्वःॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि। धियोयोनःप्रचोदयात्।
ॐ अंत्येच प्रणवः। नतोगाइपित्यादीनग्नीन्नमस्करोति। दंडवत्प्रणामेन। अश
क्त्याजानुभ्यांवा। ततःआगमाविरोधेन इष्टदेवतार्चनं। पुरुषसूक्तेनविष्णुमर्च
यतिपूर्वं। रुद्रमर्चयतिमुखेनामरुद्रिध्यसनं। नैवेद्यसुदरेहरेःपादोदकंसनि
माल्यंमस्तकेयस्यसोच्युतः। तत्रविष्णुपूजनविधिः। नारायणःपुरुषोनुष्टुप्॥
सहस्रशीर्षेतिन्यासेविष्णुपूजनेचविनियोगः। प्रथमांविन्यसेत्वामेद्वितीयां ३८
दक्षिणेकरे। तृतीयांवामपादेतुचतुर्थीदक्षिणेन्यसेत्। पंचमींवामजानुनिषष्ठीं

कट्यां। दक्षिणेके। भिमध्येतु। हृदये।
विदक्षिणेन्यसेत्। सप्तमींवा°तु अष्टमीं°दौ। नवमींना°दशमीं°न्यसेत्। एकाद
२देशेउ शींकंठे*द्वादशींवामबाहुके। त्रयोदशींदक्षि*आस्येचैवचतुर्दशीं। अक्ष्णोः लेबाहु२
पंचदशींचिवषोडशींमूर्ध्निविन्यसेत्। यथादेहेतथादेवेन्यासंकृत्वाविधान
नतः। आवाहयेद्देवंस्मृत्वापुरुषोत्तमं। द्वितीययासनंदद्यात्पाद्यंचैव
तृतीयया। अर्घ्यंचतुर्थ्यादातव्यंपंचम्याचमनीयकं। षष्ठ्यास्नानंप्रकुर्वीत
सप्तम्यावस्त्रमेवच। यज्ञोपवीतमष्टम्यानवम्याचानुलेपनं। पुष्पंदशम्या
दातव्यंएकादश्यांतुधूपकं। द्वादश्यादीपकंदद्यात्त्रयोदश्यानिवेदनं। च
तुर्दश्यानमस्कारंपंचदश्याप्रदक्षिणां। दक्षिणांतुयथाशक्त्याषोडश्याउद्व

दा ह्रौं न्मु हृदये आरूढ्वा स नासिकामुखयोः क्रमात्।५

दापयेत्। स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकं। यथाशक्ति जपित्वा तु स्तकं त

स्यु निवेदयेत्। षण्मासात्सिद्धिमाप्नोति देवदेवस्य पूजनात्। संवत्सरेण तेन वसा

युज्यमधिगच्छति। विष्णुमेवं समभ्यर्च्य इच्छया रुद्रमर्चयेत्। तत्र न्यासविधिः जरा

बोध शिखायां स्यादुङ्गणामेति मस्तके। आवो राजा नध्वा रस्य रुद्र हंसः शुचिषत्तद्भु

वो। त्र्यंबकं भद्रं कर्णेभिः नेत्रयोः कर्णयोः क्रमात्। भुवनस्य पितरं मा नो रुद्रा न ४ कंठ

क्रमेण तु रुद्रस्य येमी पश्च न्यसेदेताः क्रमेण तु। ॐ आ नो अश्व पादयोश्चैव ३८

वकुं व चेच्च। हृस्ते हृस्ते अदेदि हृद हृत्य इति क्रमेण तु। पूर्वाधितु षिविज्ञेया दिग्वंधे

चापरामता। चतुर्थो धिहिनेत्रं तु अरुद्राय चाग्रकं। एवं न्यासविधिं कृत्वा रु

ॐ कंठदेशे तथा वाक्ये न्यसिदेकाय मानसः। दिवो वराह कद्रुद्राय चो ह्रो हृदये क्रमात्। ब

ह्रीनां पिता न मिद्वं हिरण्यगर्भमेव च।३

इस्तु पोनवतिच्युत प्रेतादिनयनं भवति शापानुग्रहमसमर्थो भवति आलस्यं तेज

श्च वर्द्धते इति। ततः मानोमहांतस्त्वपनेमानस्तोकेचनिमते ति रुद्रं संपूज्य रुद्र

दर्शनार्थं प्रसन्नार्थं रुद्रजपः कार्यः तथा। रुद्रजापी दहेत्पापं प्रेतयोनिं न ग

छति। ऋग्वेदोक्तेन रुद्रजपेन रुद्रदर्शनं प्राप्नोति मिति वामनपुराणे। जप्तव्यं शात

रुद्रीयं ऋग्वेदोक्तपदक्रमैः। एवं स्त्रुते आदेवेशां पन्चयधं न तरेण च। एक न्यासपू

र्वं पूजनेन स्तुते देवा न्याति पुलस्त्य वचनं। अथ रुद्रजपः। ॐकारं ध्यात्वा तीतिस्त्रिः सा

वित्रीं च तदित्यूचं। मनसैता अनुद्रुत्य वदादिं समुपक्रमेत्। ॐकारस्य ब्रह्माग्नि

र्गायत्री। ॐ भूः विश्वामित्रोऽग्निर्गायत्री। ॐ मनुगोजमदग्नि र्यायुरुष्णिक्। ॐ स्वर्भरद्वा

नः सूर्योनुष्टुप्। उत स्य वितु विश्वामित्रः सविता गायत्री। तत्सवितु॰ ऋग्॥ ॐ अ
ग्निमीळे मधुच्छंदा अग्निर्गायत्री। अग्निमीळे॰ वर्ग॥ शिवसंकल्पो रुद्रस्त्रिष्टुप्। अंत्या
महाबृहती। यनेदं वर्ग॥ नारायणः पुरुषोनुष्टुप्। अंत्या त्रिष्टुप्। सहस्रशीर्षा
वर्ग॥ वागांभृणी रुद्रस्त्रिष्टुप्। द्वितीया जगती। अहं रुद्रेभिः वर्ग॥ कुत्सस्त्वहिषा
विश्वेदेवा रुद्रो वा उपरिष्टाद्बृहती। नतमंहो वर्ग॥ अप्रतिरथो रुद्रस्त्रिष्टुप्॥
चतुर्थी बृहती। आशुः शिशानो वर्ग॥ विभ्राड्सूर्यो जगती। विभ्राड्बृहत्। वर्ग॥ नृ
पते भुवपते इति सूक्तिः। कण्वो रुद्रो गायत्री। अंत्यानुष्टुप्। कद्रुद्राय वर्ग॥ कुत्सो ५०
रुद्रो जगती। द्वित्रिष्टुबंतं। इमा रुद्राय तवसे वर्ग॥ गृत्समदो रुद्रस्त्रिष्टुप्। आ ते पि

तमर्रुतां वर्ग॥ वसिष्ठो रुद्रस्त्रिष्टुप्। इमा रुद्राय स्थिर॰ वर्ग॥ वसिष्ठो रुद्रानुष्टुप्। त्र्यं
बकं यजामहे इत्यनेन जपनिवेदनं। उत स्य त इति सर्वत्र। इति रुद्रजपः। तथैवाद
वतां पूजयेत्। गुरूपदिष्टेन साकारं निराकारं च ध्यानं। ततः आचार्यादीनां गुरूणा
मभिवादनं। मातापित्रोश्च दंडवत् प्रणामात्। नरकं न पश्यति। ततः चंदनं रोचनं
हेमघृदंगां मणिदर्पणं। गुरुमग्निं तथा सूर्यं प्रातः पश्येत्सदा द्विजः। स्वक्ष ब्राह्मीरा
मी दूर्वां चंदनं शंखपुष्पिकां। सिद्धार्थानि प्रियंगुं च प्रातः शिरसि धारयेत्। ततः पश्चा
त्क्रियकांतं वेदाभ्यासो विधीयते। वेदस्वीकारणं पूर्वं विचारोभ्यसनं जपः। शिष्ये
भ्यः संप्रदानं च वेदाभ्यासो हि पंचधा। यच्छाखीयैस्तु संस्कारैः ब्राह्मणः संस्कृतो भवेत्।

तछाखाध्ययनंकुर्यात्यक्केनपतितोभवेत्।यःस्वशाखांपरित्यज्यपारक्यमधिग
छति।सशूद्रवद्बहिःकार्योइत्येकदेद्विजोत्तमः।योनधीत्यद्विजोवेदमन्यत्रकुरु
तेश्रमं।सजीवन्नेवशूद्रत्वमाशुगच्छतिसान्वयः।यज्ञानांतपसांचैवशुभानांचैव
कर्मणां।वेदएवंद्विजातीनांनिःश्रेयसकरःपरः।तपोविशेषैर्विविधैर्व्रतैश्चवि
धिचोदितैः।वेदःकृत्स्नोधिगंतव्यःसरहस्योद्विजन्मना।निरग्निकस्यायंकालो
स्या३ ब्रह्मयज्ञश्चसायंवैश्वदेवांतः।तदुक्तं।सर्वार्वाक्तर्पणंकार्यंपश्चाद्वाप्रातरा
हुतेः।वैश्वदेवावसानेवानान्यत्रस्नाननिमित्तकात्।अथसायंवैश्वदेवः।गृह्ये। ४१
दक्षिणंप्राचीपित्र्यो।उत्तरांदैव।प्राचीमेविके।तथा।प्राङ्मुखायानिदैवकर्माणि।द

क्षिणान्यायानिपित्र्याणि।तथा।यज्ञोपवीतीदैवकर्माणिकरोति।प्राचीनावीतीपि
त्र्याणि।तथा।दक्षिणंपातयेज्जानुंपित्र्यपरिचरंसदा।तथा।गृह्ये।अनूद्दंजुहु
यान्नानुद्धुत्यान्नवदाइतिः।नहिवायुक्तंदेवाःप्रतिगृह्णंतिकर्हिचित्।सायं
सायंप्रातर्वैश्वदेवः।विश्वदेवस्यसिद्धस्यसायंप्रातर्गृह्येग्नौजुहुयात्।तत्रवि
धिः।परिसमूहनंत्रिःपर्युक्षणंच।उदकसंस्थांसमिधमाधायदक्षिणपाणिना
जुहुयात्।दैवतीर्थेनकराग्रंदैवतीर्थं।वामदेवोलिंगोक्तादेवता।अग्नयेस्वाहा।
सोमाय॰।इंद्राग्निभ्यां॰।विष्णवे॰।नरहाज्वधन्वंतरये॰।विश्वेभ्योदेवेभ्यः।प्रजाप
तये॰।अदितये॰।अनुमतये॰।अग्नयेस्विष्टकृतेस्वाहा।उदकोपस्पर्शनं।कुर्ने

हविष्यन्नस्येत्यागः। इति अग्नये नम इत्यादि प्रत्येकं अग्निसंबध्यते सर्वत्र। उपरि
ष्टात्समिधमाधाय। त्रिः पर्युक्ष्य। कृतशेषमन्नसोदकं स्रुचा तेन बलिहरणं। ॐ
अग्नये नमः। इत्यादि दशभ्यः। आहुतिदेवताभ्यः। प्रदक्षिणतः। प्रत्यग्नेः उद
कसंस्थः। गृहमध्ये बलिं दद्यात्। उदकोपस्पर्शनं ततः पुरस्तात्। नमो ब्रह्मणे। ब्राह्म
णेभ्यो नमः। वसिष्ठो वास्तोष्पते त्रिष्टुप्। वास्तोष्पते प्र॰ नमः। वास्तोष्पतये नमः
पूर्वस्यां। नम इंद्राय। ऐंद्रेभ्यो नमः। दक्षिणतः। नमो यमाय। याम्येभ्यो नमः। उप
कोप॰ पश्चात्। नमो वरुणाय। वारुणेभ्यो नमः। उत्तरतः। नमः सोमाय। सौम्येभ्यो ४२
नमः। ऊर्ध्वायां दिशि। नमो बृहस्पतये। बार्हस्पत्येभ्यो नमः। मध्ये विश्वेभ्यो देवेभ्य

इति केचित्। आग्नेय्यां कोणे। आदित्याकारेण मंडलं। नमो अदितये। आदित्ये
भ्यो नमः। नमो नक्षत्रेभ्यः। ऋतुभ्यो नमः। मासेभ्यो नमः। अर्द्धमासेभ्यो नमः। अ
होरात्रेभ्यो नमः। संवत्सरेभ्यो नमः। द्वारि पूष्णे पथिकृते नमः। देहल्यां धात्रे नमः। द
क्षिणस्यां शाखायां विधात्रे नमः। उत्तरस्यां मरुद्भ्यो नमः। उत्तरंगे विष्णवे नमः। दृष
दि वनस्पतये नमः। उलूखले उषधीभ्यो नमः। उषधीनां स्थाने धान्यस्थाने पर्जन्या
य नमः। मणिके उदस्थाने अद्भ्यो नमः। शय्यायां शिरसि नमः श्रियै। पादतः भद्रका
ल्यै नमः। अनुगुप्तदेशे मूत्रपुरीषस्थाने नमः। सर्वान्नभूताय नमः। अथांतरिक्षे न
क्तंचरेभ्यो नमः। इति सायं। अहश्चरेभ्य इति प्रातः। अंतरिक्षे एव। परुच्छेपो विश्वेदे

वास्त्रिष्टुप्॥ ये देवासो दिव्येकादशस्थेति॥ १ मंत्रेण अविज्ञाताभ्यो देवताभ्यो नमः॥
अंतरिक्ष एवा उत्तरतः॥ धनपतये नमः॥ अग्नये नमः इत्यादि देवतानां प्रत्येकं
त्यागः॥ कार्यः॥ इदमग्नये इत्यादि॥ अथ प्राचीनावीती दक्षिणामुखः दक्षिणतो दर्भा
नास्तीर्य शंखः पितरस्त्रिष्टुप्॥ ये अग्निदग्धा इति पितृभ्यः॥ स्वधा नमः॥ इदं पि
तृभ्यो न ममेति पूर्ववत्संस्थाप्य॥ यज्ञोपवीती॥ उदकोपस्पर्शनं ततः हुतशेषं प्रदायानु
ष्ठितं त्र्यायुषं पंचभिर्मंत्रैः प्रतिमंत्रं ललाटे हृदये दक्षिणस्कंधे वामे च ततः ४३
पृष्ठे पंचसु भस्मना त्रिपुंड्रं करोति इति शांखायनः॥ मंत्रो यथा॥ त्र्यायुषं जमद
ग्नेः कश्यपस्य त्र्यायुषं इत्यादि॥ ततः तच्छंयोरावृणीमहे इति जपित्वा॥ पर्युक्ष्या

वसुश्रोतोग्निस्त्रिष्टुप्॥ विश्वानि नो इति द्वाभ्यां प्रज्वलयति॥ यस्मै त्वमिति प्रस्थानं
पिंडवत्प्रतिपत्तिः॥ स एतेषां वेदानामेकं द्वौ त्रीन्सर्वान्वाधीते य एवं वा
ग्निमुपतिष्ठते॥ विमदोग्निर्विराट्॥ मंडूनो अपि वातयमनः॥ श्यावाश्वः सविता
गायत्री॥ ॐ विश्वानि देव सवितरिति दंडवत्प्रणामेन नमस्कारं करोति॥ उक्त
सत्॥ शांखायनः॥ विश्वदेवमिमं येत्र सायं प्रातः प्रकुर्वीत॥ ते अर्थैरायुषा की
र्त्याः प्रजाभिश्च समृध्युः॥ ततः॥ आयुःकामार्थी॥ आ नो भद्राः क्रतवो यंत्विति
दशर्चं सूक्तं॥ जपेत्॥ इति साग्नेर्विश्वदेवविधिः॥ नित्यश्राद्धादि गृह्योक्तं माध्यन
क्षिके कर्मणि भवंति॥ यतः॥ षंदे गृहस्थाश्रम माश्रमाणां विश्रामवृक्ष वसुधात

लेस्मिन्नादेवामनुष्याःपितरश्चसर्वेमध्यंदिनेचान्नकंबहुमंति।तथा।मध्यान्ह
संध्ययोःसर्वादेवसमागमः।इतिपराशरः।पश्चेदात्मनेऽग्निमित्यादिवचनदृ
तेः।मध्यान्हकर्माणिनित्यश्राद्धादि।ब्रह्मयज्ञस्तुअन्येवमध्यान्हेवायथासं
भवःकार्यः।अध्ययमेकंअनुवाकमेकंसूक्तंचैकंवर्गमेकंयथार्थं।एगासं
ख्यायः।पठेत्प्रयतयुक्तःसब्रह्मलोकान्ननिवर्ततिहि।स्वाध्यायोब्रह्मयज्ञस्या
देवयज्ञोग्निहोमकः।भूतयज्ञोबलिः।प्रोक्तोहुतशेषान्नतस्ततः।पितृयज्ञस्तु
तर्पणेनस्वधनपितृभ्यइतिविश्वदेवान्नदानेननित्यश्राद्धेनसिध्यति।उदपा ४४
त्रातुदातव्यमाकाशस्तुकुर्यादपि।आसूक्तादानुवाकाद्वाब्रह्मयज्ञोविधीयते।

इतिशांखायनः।अथब्रह्मयज्ञविधिः।पादौप्रक्षाल्यद्विराचम्यप्रागग्रेषुद
र्भेषुप्राङ्मुखआसीनःदर्भपाणिःपवित्रदर्भगर्भबद्धांजलिः।प्रणवव्याहृ
तीरुक्त्वासावित्रींपच्छोर्द्धर्चशस्त्रकृनवानंचोक्त्वाप्रणवमुक्त्वाऋचंसूक्तंअनु
वाकंवागायत्रींचेतिहासपुराणंवामंडलमध्यमेनस्वरेणाधीत्यनमोब्र
ह्मणइतित्रिरुक्त्वाउत्तरसंस्थांप्रारभ्यअंतमदितिसमापयेत्।ग्रामेमनसा
धीयीत।वेदमादितआरभ्यशक्तितोऽहरहर्जपेत्।संहितांब्राह्मणंचैवब्रह्म
यज्ञेपठेदिति।गायत्रीतिहासपुराणस्तोत्रादिकमवैदिकविषयमितिब्रह्म
विधिः।सपवित्रौसदर्भौवासंध्यादिषुचकर्मसु।करौविप्रेणकर्त्तव्यौकर्मणः

सिद्धिहेतवे। विद्वान्नागरविप्रमुख्यतिलकः श्रीवत्सराजोग्रणीर्नृणां भाग्यवती
च पुत्रमचलं सूते स्म विद्वत्प्रियं। तेनाथ क्रियते यमाह्निकविधिः सन्नः सुराणां
मते सन्मार्गस्थपदं सदाभिलिखतां ध्यंते यथादीपकः। अचलेन द्विवेदेन मंडो
डेनाग्निहोत्रिणा। प्रातश्चर्या द्विजस्योक्ता स्थितये ब्रह्मतेजसः। स्वशाखाविहित
स्मार्त्तकर्मानुष्ठानक्रमविवर्त्तेषु प्राप्तस्थितवेदाध्ययनहितप्रातर्विहितस्तोत्रप्रा
तःस्नानस्नानांगतर्पणसंध्यासूर्योपस्थानगायत्रीजपसंध्याविसर्जनहोमका
जप्रातर्जपदेवपूजाप्रातर्वंदनयोग्यवेदाध्ययनसाग्निकवैश्वदेवब्रह्मयज्ञ
विधिः। इति प्रातः कर्मविधिः। प्रातर्विध्यनंतरं समेतानाचार्यादीन्नमेत्। तदुक्तं। ४५

अहरहराचार्यानभिवादयेद्गुरूंश्च समेत्य श्रोत्रियस्य श्रोध्य प्रत्येत्या श्रो
त्रियस्यापि। इति। अनंतरं योगक्षेमार्थं राजानं अन्यं श्रीमंतं अकुत्सितमन्यमप
याल्लं लब्धस्य पालनं क्षेमः। तदर्थं गंतव्यं राजकुलेह ऋष्याराजपूजिता लोका
यद्यपि न भवंत्यर्थास्तथाप्यनर्था विनश्यंति। अलब्धलाभो योगः। अप्राप्तस्यान
यनं। गृह्यस्मृतिरपि। उंछशीलमयाचितप्रतिग्रहं साधुभ्यो याचितो वायात्मनं ह
त्तिः पूर्वं पूर्वं गरीयः संसिध्यमानानां वैश्यवृत्तिर्वा प्रमत्तः। पितृदेवतकार्येषु॥
स्वकर्मानुष्ठानाविरोधेन सर्वत्र। तथा। ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कथंचन। ऋतं उंछशीलं। ज्ञेयममृतं स्यादयाचि

तं। मृतं च याचितं भैक्षं प्रमृतं कर्षणं स्मृतं। सत्यानृतं तु वाणिज्यं तेन चैवापि जी
वितं। इश्वराणां द्वारिस्थित्वा इव विज्ञप्तियाचनं श्ववृत्तिः। अथवा सेवा श्ववृत्तिः। प्रेष्य
रूपाणां वर्जयेत्ता। स्वकर्मणः अबाधेन राज्ञा सेव्यः। यात्रामात्रप्रसिद्ध्यर्थं स्वकर्मनि
रगर्हितैः। अक्लेशेन शरीरस्य कुर्वीत धनसंचयं। न हिरण्यादिप्राप्तिर्यथा भ
वति। ये त्वात्यादिमदोन्मत्ता नरेन्द्रान्नानुपासते। तेषामामरणाद्भिक्षा प्रायश्चित्त
मिवार्पिता। तथा। अर्थिनो विभवत्यागः स्वान्तं वृत्तं च चित्तज्ञता। इति पंचगुणोपेतमा
स०पा०२ श्रयेताश्रयं सकुशीदेन स्वष्टावाप्नोति। यतः वृद्धौ च मातापितरौ साध्वी भार्या शि ४६
शुःसुतः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्। अद्रोहेणैव भूतानामल्पद्रो

हेण वा पुनः। या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि। इति जीवनोपायविधिः।
अथ माध्यान्हिककर्मनिरूपणाय तावत्स्नानादनुक्रियमाणस्य तर्पणस्य वि
धिः पूर्वं प्रदर्श्यते। आचाराल्लते फलाधिकं वं स्यात्। स्मृतिस्थ। स्नानार्थमभिगच्छंतं
देवाः पितृगणैः सह। वायुभूतास्तु गच्छंति तृषार्ताः सलिलार्थिनः। निराशास्ते
निवर्तंते वस्त्रनिःपीडनेन ते। तस्मान्न पीडयेद्वस्त्रं अकृत्वा पितृतर्पणं। वस्त्रं।
स्नानवस्त्रं। पितृतर्पणं त्वाद्रवपितृमनुष्यादि उपलक्ष्यते। आगतातपः। तथा स
र्वाणि नृणां निस्थावराणि चराणि च। विप्रादुदकमिच्छंति सर्वाण्युदकार्थिनः। त
र्पणं तु ततः कुर्यात्त्रिप्रत्यहं स्नातको द्विजः। देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्र

मं।पाराशरः।सव्येन चोपवीतेन देवानां पितृतर्पणं।पितॄणामपसव्येन मनुष्या
णां निवीतिना।सत्यतपाः।देवपितृमनुष्याणां स्वशाखाविधिचोदनात्।अंनसों
जलयो देयाः प्रथमांते च नामतः।पूर्वमुखस्तु देवानां पितॄणां दक्षिणामुखः।उ
दङ्मुखो मनुष्याणां द्विजस्तर्पणमाचरेत्।तथा।तर्पणं देवतानां तु पूर्वं स्वास
माहितः।अधिकारी भवेत्पश्चात्पितॄणां तर्पणे तथा।पाराशरः।ऋजुदर्भेण देव
तीर्थेन देवान्।द्विगुणदर्भेण पितृतीर्थेन पितॄन्।दर्भमध्येन कायतीर्थेन मनु
ष्यान्।तर्पयेदिति।गृह्यस्मृतिः।करायं देवतीर्थं।अंगुष्ठकनिप्रदेशिनीमध्ये पि ४७
त्र्यं।कनिष्ठिकामूले कायं।अन्वारब्धेन सव्येन दक्षिणेन तु पाणिना।सव्योत्तरा

भ्यां पाणिभ्यामथवा तर्पणं भवेत्।एकैकमंजलिं देवा द्वौ द्वौ तु सनकादयः।अर्ह
तु पितरस्त्रींस्त्रीन् स्त्रियश्चैकैकमंजलिं।मातृमुख्यास्तु यास्तिस्रस्तासां दद्यान्न
त्रांजलीन्।अन्यासां पितृपत्नीनां दद्यादेकैकमंजलिं।एकैकमंजलिमिति सा
पत्नीमातृविषयं।यमः।द्वौ द्वौ स्त्रौ युग्मतः स्त्रीणां पूरयेदुदकांजलिं।गोशृंगमा
त्रमुद्धृत्य जलमध्ये जलं क्षिपेत्।स्मृत्यर्थसारे।श्राद्धे पिंडविवाहे च दाने त्वेके
न दीयते।तर्पणे त्वन्ययोनिवज्जलं देयं तु नान्यथा।यत्तु।उभाभ्यामेव हस्ताभ्या
मुदकं यः प्रयच्छति।स मूढो नरकं याति कालसूत्रमवाक्शिराः।एकेनोक्तमिदं
दैवतर्पणविषयं।अन्येनोक्तं निर्मूलं।अपरेणोक्तं दीनारकविषयं।एवं विप्र
रा।२

तिपञ्चाः तर्पणे त्वभयेनेव । एकहस्तेन तोयेन न कुर्यात्तर्पणं क्वचित् । पितरो न प्र
शंसंति न प्रशंसंति देवता । दक्षः । दर्भाग्रैस्तर्पयेद्देवान्मूलाग्रैस्तर्पयेत्पितॄन् । म
नुष्यान् दर्भमध्येन तर्पणे यं विधिः स्मृतः । अयं क्रमस्त्वाश्वलायनेनोक्तः । देवपि
तृनरेभ्योदवेति । याज्ञवल्क्यः । वामपाणितलेमूलं कुशाग्र्यायं तु दक्षिणे । मनुष्ये
भ्यो जलं देयं इंत कारेत्तु देववत् । स्मृतिसारे । शुक्लैस्तु तर्पयेद्देवान्मनुष्याञ्छब
लैस्तथा । पितॄंश्चैव तर्पयेत्कृष्णैस्तर्पयस्त्वसदा द्विजः । देवब्रह्मर्षीश्चैव तर्पयेदक्ष
तोदकैः । तिलाभावे स्वर्णरूप्यताम्रदर्भयुतोदकैः । खड्गमौक्तिकहस्तेन कार्यं वा ४८
पितृतर्पणं । न केवलं जलेनैव कर्तव्यं संततिसंभवे । आचारतिलके । रवौ शुक्रे च

योर्द्वयोः सप्तम्यां निशि संध्ययोः । संक्रांतौ च गृहस्थश्च न कुर्यात्तिलतर्पणं । त
था । सप्तम्यां रविवारे च जन्मर्क्षदिवसेषु च । गृहे निषिद्धं सलिलं तर्पणं तद्बहिर्भ
वेत् । शोभने गृहे शोभने दिने च न तिलतर्पणं । तज्जीवत्पितृकः सम्यक्तिलैस्तर्प
णमाचरेत् । इत्यादिषूक्तेषु वचनानां तिलानां निषेधेन यवमिश्राणां । तथा च पुरा
णे तु । देवेभ्यश्च पितृभ्यश्च दद्यात्तिलयवोदकं । न कदाचिन्निषेधोस्ति तस्य वारा
दिसंभवः । एवं तिलानां निषेधे पि यवमिश्रितानां न निषेधः । तिलैस्तु दर्भसंयुक्तैः
स्वधया दीयते तु यत् । तत्सर्वमक्षयं चापि पितॄणामुपतिष्ठति । तदेव प्रवेशांता
शाकेषु जानुदघ्नजलस्थो यानानि माचरेज्जोपि वा । गोशृंगमात्रमुद्धृत्य करोतु

दक्षिणामुखः आकाशे तु क्षिपेद्वारि पितॄणां तृप्तिमिच्छया। पितॄणां स्थानमाकाशं
दक्षिणा दिक् तथैव च। स्मृतिरपि। आपो देवगणाः सर्वे आपः पितृगणास्तथा।
तस्मादापो जले देयाः पितॄणां दत्तमक्षयं। स्थले वस्त्रे तथा पात्रे रोमकूपे च यन्म
य। तर्पणे श्राद्धदानादौ न मुंचेद्युक्तिलाक्षतान्। अथ तर्पणक्रमः। नृसिंहपुरा
णात्। पितरौ मातरश्चाथ सपत्नजननी तथा। ततो मातामहानां च मातामह्यस्त
तः परं। पितृव्यश्च पितृष्वसा मातुलस्तदनंतरं। ततः पत्नी विनिर्दिष्टा अन्ये गोत्रानाऽ
नुजस्ततः। पितृवंशा मातृवंशा अन्ये च संतबांधवाः इत्यादि। तेषां तु तर्पणं कार्यं ४९
इइंते येन चाथिनः छंदोगपरिशिष्टे। छायां यथेच्छेच्छरदातपार्त्तः पयः पिपासु

क्षुधितो यथान्नं। बालोऽजनित्रीं जननी च बालं तद्वच्च पुत्रान् पितरः स्मरंति। अ
तः पितृगणं सर्वं तर्पयेत्स्नानकर्मणि। नजीवंतमतिक्रम्य निषेधस्तु न तर्पणे।
अथ स्नानतीर्थे स्नानादि न कुर्यात्। तदाह पाराशरः। वासांसि धनवतो यत्र प
तंति जलबिंदवः। तत्पुण्यं जलस्थानं स्नानकस्य शि--- तत्र पीताजलं विप्र
श्रांतस्तृट्परिपीडितः। तदेनसो विशुद्ध्यर्थं कुर्याच्चांद्रायणं व्रतं। अथ मध्यस्न
स्नानविधिः। समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्। दर्भाभावे स्वर्णरू
प्यताम्रैः कर्मक्रियाः सदा। स्नानकाले तु संप्राप्ते संभारानाहरेदिमान्। मृद्भस्मति
लपुष्पाणि दूर्वापामार्गगोमयं। शिरः श्रोत्रं च धौतवस्त्रं पात्रमन्यत्कुशाणाय च। एकांत

मुदकं गत्वा तटं प्रक्षाल्य पाणिना। तत्र संस्थापयेत्सर्वं यथादेशं पृथक् २। स्नाना
र्थं गच्छतां पुंसां शौचशंका भवेद्यदि। तीर्थे निक्षिप्य संभारांस्तत्कुर्याद्यथारुचिः
। मूत्रमीमे वा व्रजच्छेत् यावल्यादशुचिर्द्विजः। आचम्य प्रयतः पश्चात्स्नानं विधि
वदाचरेत्। मृत्तापकर्षणं पार्श्वे मंत्रवत्तु जले स्मृतं। अथ स्नानविधेः पदार्थाः। मू
ह्ननादिप्सहीवोदकं गत्वा। चतुर्हस्तं रजकादिदोषरहितं तटं प्रक्षाल्य मृदादिसं
नारं मुक्त्वा। आचम्य विष्णुस्मरणं। वरुणावाहनं। तीर्थदेवताप्रार्थनं मृत्तिकारवन
नपावनशिरोललाटाद्यनुलेपनं ब्रह्मसूत्रेश्चालनस्नानं कृत्वा तटमुपविश्य
आचमनं मंत्रेण। ततः प्राणायामपूर्वकं स्नानविधिप्रयोगः। पुनर्मृत्तिकाग्रह

णं। सूर्याय दर्शयित्वा शिरोललाटाद्यनुलेपनं मृदा गोमयेन। पूर्वापामार्गाभ्यां मं
गानि मार्जयित्वा। नाभिदघ्ने जले प्रविश्य आपो हि ष्ठादिमंत्रैर्मार्जनं। आपो अ
स्मानित्यृचा निमज्ज्योत्थाय पुनर्जलमध्ये नासिकां धृत्वाऽघमर्षणं त्रिर्जपेत्। वि
ष्णुमंत्रेण सह। ततः त्रिः पंच वा सप्त निमज्ज्य तटमुपविश्याचमनं मंत्रैः। स्नानांग
तर्पणं इति स्नानविधेः पदार्थास्त्रिवेदानिमताः। ऋषिदेवताभिधानपूर्वं मंत्रैका
र्यं। इति स्नानविधेः पदार्थानुक्रमः। हस्तौ पादौ प्रक्षाल्य द्विराचम्य विष्णुस्मरण
मिदं। विष्णुरिति मेधातिथिर्विष्णुर्गायत्री। अनयोः पो वरुणस्त्रिष्टुप्। तत्त्वायामी
ति वरुणावाहनं। ततस्तीर्थदेवताप्रार्थनं। उत्तिष्ठंत्व महद्भूताः पापनकाः। भूताना

मं॰मेत। अतितीक्ष्णाम॰म। नैरवायनम॰सि। तथा। हिरण्यशृंग वारुणं तीर्थं मे दे
हि याचितः। यन्मनुक्तमसाद्धिकं पापंमेदहतुयं ऽ। तथा। यन्मे वाचाथमनसाक
र्मणादुःकृतंकृतं। तन्नइंद्राथवरुणोबृहस्पतिःसविताचपुनात्विति उदकांजलि
प्रक्षेपः। ततः अगस्त्यऽइंद्रस्त्रिष्टुप्। अगस्त्यःखनमान इति मृत्तिकाखननं। मधु
छंदाःसरस्वतीगायत्री। पावकानइतिमृत्तिकामभिमंत्रयति। व्यासोमृत्तिकानुष्टु
प्। अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे। मृत्तिकेहरमेपापंयन्मयापूर्वसंचि ५१
तं। उद्धृतासिवराहेण कृष्णेनशतबाहुना। मृत्तिके ब्रह्मरूपासि काश्यपेनसमु
द्धृता। मृत्तिकयाशिरःललाटंद्वाभ्यांनासिकेतथोपरि। उरुद्वयोस्तिदृनिस्ताभिःपृथ

क्पादौतुपंचभिः। ग्रस्तांत्यब्रह्मस्तवंचमृद्भिरद्भिःशनैःशनैः। स्नानंकुर्यात्। तदेव
पवित्रय। विमदोऽग्निर्विराट्। नर्द्इअपिवातयमन इति त्रिःजप्त्वं त्रिःपिबेदपः। ततःप्रा
णायामत्रयंकृत्वा। अद्येतिस्नानविधिनास्नानमहंकरिष्ये। शुनःशेपोवरुणस्त्रिष्टु
प्। उदुत्तममितिवरुणायअर्घ्यंदद्यात्। मेधातिथिर्द्यावापृथिवीगायत्री। महीद्यौःपृ
थिवीचनइतिमृत्तिकायहणं। हस्ताभ्यां। हिरण्यस्तूपःसविता त्रिष्टुप्। आकृष्णेनेति
सूर्यायदर्शयति। मेधातिथिःपृथिवीगायत्री। स्योनापृथिवीतिशिरोललाटंबाहूरु
दयेजंघेपादौपृष्ठंचेव इति अंगानिमृदालिंपति। व्यासोगोमयनुष्टुप्। अग्रमग्रंचरंती
नामोषधीनांरसंवने। यन्मेरोगंचशोकंचतन्मेदहतुगोमयं। मृत्तिकावद्गोमयेन। अ

ग्निर्दूर्वानुष्टुप्। कांडात्कांडात्प्ररोहंति परुषःपरुषः परि। एवानो दूर्वे प्रतनोषि सहस्रे
ण शतेन च। या शतेन प्रतनोषि सहस्रेण विरोहसि। यस्यास्ते देवीष्टके विधेम हवि
षा वयं। इति दूर्वयाः शिरस आपादं अंगानि अभिमृशेत्। वामदेवो अपामार्गोनुष्टु
प्। अपाघमपकिल्बिषमपकृत्यामपोरपः। अपामार्ग त्वमस्मदपदुःष्वप्न्यं सुव। अनेन
दूर्वावदंगानि शोधयेत्। नाभिदघ्नं जलं प्रविश्य आपोहिष्ठेत्यादि निर्मार्जयति। सि
धुद्वीपापोगायत्री। आपोहिष्ठा। वसिष्ठ आपस्त्रिष्टुप्। समुद्रज्येष्ठाः। सिंधुक्षिद्यो
जगती। इमं मे गंगे। एताभिर्मार्जयति। संहिता विषये पावनानि सरस्वत्यब्देवता ५२
निसूक्तानि तैर्मार्जिनं। कालविशेषतीर्थविशेषेवाभवत्येव। मार्जनानंतरं देवश्रवा

आपस्त्रिष्टुप्। आपो अस्मानिति पादत्रयमुक्त्वाभिमंत्र्योच्छाय चतुर्थंपादं पठेत्। उदि
राभ्यः शुचिरापूतएमीति। यत्किंचेदमिति इदं विष्णुरिति वरुणोस्मरंतिमज्जति। अंत
र्जले नासिकांनिमज्ज्य नासिकां गृहीत्वा। अघमर्षणोभाववृत्तोऽनुष्टुप्। ऋतंचसत्यंचे
ति त्रिर्जपति। त्रिर्जपेदघमर्षणमिति वचनात्। मेधातिथिर्विष्णुर्गायत्री। तद्विष्णोरि
ति जपति। यतः सप्तजन्मकृतंपापंहत्वा चाभक्षभक्षणं। तद्विष्णोरित्यपांमध्ये सकृ
ज्जप्त्वा विशुध्यति। इति। त्रिःपंचसप्तकृत्वो वा निमज्ज्य। आचमनं श्रुतिनिः। ॐ भूः।
ॐ भुवः ॐ स्वः इति। स्नानांगतर्पणं ततः जलमध्ये आङ्गिरससतर्पणं कुर्यात्। ध्रुवः
। धरः। सोमः। आपः। अनिलः। अनलः। प्रत्यूषः। प्रभासः। इति अष्टवसून्तर्पयति। यथा।

अच्छिन्नदर्भान्गृहीत्वा। पूर्वाभिमुखयज्ञोपवीती शांखायनः। स्वाहास्वधमहंतचेतिदे
वपितृमनुष्येषु चेति दद्यात्। जलांजलिं पूरयित्वा क्षिपेत्। तृप्यंत्विति तर्पणे। पराश
रस्कः। देवास्तृप्यंतु। पितरस्तृप्यंत्विति निदर्शनं। ध्रुवस्तृप्यतु। धरस्तृप्यतु। इति अष्टौ
वसवः। जंबुकायस्वाहेति। अग्न्यादयो देवतास्तृप्यंतु। पृथिव्यादीनि तत्वानि तृप्यं
तु। प्राचीनावीती। दक्षिणामुखः। व्रातचिंनादयऋषयस्तृप्यंतु। सुमंतादय आचार्या
स्तृप्यंतु। इति पुरुषं च पितरः। पित्रादिपितृवंशास्तृप्यंतु। मातामहादिमातृवंशास्तृ
प्यंतु। सव्यं। आचमनं। नीवीतिकंठलंबितं यज्ञोपवीतं हारवत्। उदङ्मुखः। दर्भम ५३
ध्येन मनुष्यतीर्थेन। सनकः सनंदनः सनातनः आसुरिः कपिलः वोढुः पंचशिखः।

एते मनुष्या ब्रह्मपुत्राश्च। सनकादयो मनुष्यास्तृप्यंतु। ये चान्ये आनायस्ते सर्वे तृ
प्यंतु। ततः सव्यं। आचमनं। आब्रह्मस्तंबपर्यंतं जगत्तृप्यतु। इति त्रिरुदकांजलिरु
त्क्षिपेत्। ततस्तेनिवस्नानवस्त्रेणैव संध्यातर्पणं जलस्थ एव कुर्यात्। अथवा।
जलाशयादुत्तीर्य धौतवस्त्रद्वयं परिधाय पूर्वं उपरितनं। पश्चादधस्तनं। नाभोष्ट
च्छे वामकक्षे त्रिकच्छो ब्राह्मणः स्मृतः। न च कुर्याद्विपर्यासं वाससां परिधापने। यज्ञो
पवीतवद्धार्यं वस्त्रं त्रिवोत्तरीयकं। सव्यापसव्यं तत्कुर्यात् कर्मकाले सदा बुधः। अप
मृज्यान्न च स्नातो गात्राण्यंबरपाणिना। न चापि धूतये केशान्वाससी न च धूनयेत्। यज्ञो
पवीती नाभाव्यं सदा बद्धशिखेन चेति। ततो जंघे पादौ मृदाद्भिः प्रक्षाल्य हिराचम्याञ्ज

ऊर्द्धपुंड्रं कुर्यात्। चंदनादि। ततः यदपां क्रूरमासत्त यदमेध्यं चकिं। चन। अशांतमलि
नं यच्च तत्सर्वमवगच्छतु। गृहीत्वा तेन मंत्रेण तोयं सव्येन पाणिना। प्रक्षिपेद्दिशि
नैरृत्यां रक्षोपहतये द्रुतं। ततः विमदो ग्निविरीद्। नड्न्रो अपिवातयमन इति उ
त्रिर्जप्त्वं उदकं पिबेत्। त्रिः स्नानवस्त्रनिःपीडनं तर्पणांते। अथ मध्यान्हसंध्यामुपासी
त प्रातःसंध्याविशेषमाह। माध्यान्हिकायां संध्यायां सर्वदिवसमागमः। इति पारा
शरः। नजले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा। तर्पणाचमनं जाप्यं मार्ज्जनादि कमा
चरेत्। शुष्कवस्त्रेण जले स्थितो न कुर्यात्। आर्द्रवाससा तु स्थले स्थितो न कुर्यात्। त ५४
था च स्मृत्यर्थसारे। ब्राह्मस्नानेन सूर्यार्घजपो सन्ध्ने तर्पणे। जलांबुडो माधुष्केण

जलेकुर्वंन दुष्यति। स्थले स्थित इति शेषः। अथ मध्यान्हसंध्याविधिः। विधिवदा
चम्य प्राङ्मुखः करयोः कृत्वा न पवित्रकौ वा स्ववांउ विष्णुस्मरणादारभ्य प्राणाया
मपर्यंतं प्रातःसंध्योक्तन्यासमहितं सर्वं प्रातःसंध्यावत्। आचमने विशेषः। आपः
पुनंत्विति मंत्रस्य वामदेव ऋषिः आपो देवता। अनुष्टुप् छंदः। आचमने विःगः। मं
त्रो यथा। आपः पुनंतु पृथ्वीं पृथ्वी पूता पुनातु मां। पुनंतु ब्रह्मणस्पतिर्ब्रह्म पूता
पुनातु मां। यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम। सर्वं पुनंतु मामापोसतां च प्र
तिग्रहं स्वाहा। पुनराचम्य विधिवत्। ततः मध्यान्हसंध्याध्यानं। वामदेवः संध्या गा
यत्री। ध्याने विःगः। मध्यान्हसंध्यासावित्री युवा नाश्वेतांगी श्वेतवाससा वृषभस्कं

धसमारूढा त्रिश्रच्छ्यइत्यारुद्रदेवत्या यजुर्वेदमुखी आयाहि वरदे देवी त्र्य
क्षरे रुद्रनिर्मिता। सावित्री छंदसां माता रुद्रलोग सह आवह। मार्जनादि अंजलिप्र
क्षेपांतं सर्वं प्रातः संध्यावत्। प्रातर्नाभौ करौ स्थाप्य सायं ध्येये चास्मुखो तथा। मध्यन्हे
सन्तु दंजलिरिति विशेषः। उदुत्यमिति च। मध्यन्हे चोर्ध्व इत्याद्यासु पस्थाने विधिस्मृ
तः। गायत्र्यौपस्थानं प्रातर्वहिर्धिः। प्रातर्नाभौ करो स्था मध्यन्हे हृदयस्थितः। सायं
मुखसमीपेतु एषज्ञाप्यविधिस्मृतः। ततः संध्याविसर्जनं। पूर्ववत्। ततः वामदेवः
सूर्योज्जिगती। हंसः शुचिषद्वसुरितिज्जपति। अर्घ्यांश्च सूर्यदैवत्यान् यथारुच्या। यज्ञ। ५५
आ इरीमक्रूपेक्षिपिद्रुन्तर्पयेदिति। वचनं छंदोगविषयं। शांखायनशाखायां अ

ध्वर्युशाखायां चत्रपादिकं निर्वाप्य पितॄस्तर्पयेत्। स्नातउपस्पर्शनकाले वगाह्य दे
वतास्तर्पयति। इति गृह्यं। शांखायनगृह्योक्तनामोक्तांजलिमाददेत्। नत्वग्यचेनु
मन्त्रेतत्तर्पयामीति चाप्नुयात्। यथा। प्रथमांतं द्वितीयांतं यथोद्दिष्टं तथैव वत्। उ
दकांजलिप्रदानं वा शांखायनमतानुगैः। प्राङ्मुखः कृत्स्नं उदकं निगृह्णी चादेवती
र्थेन इत्यौ युग्मतः स्नचा एकैवमंजलिं देवानां। वामदेवो लिंगोक्तदेवता। सव्ये
न। अथ देवताः। उ अग्निस्तृप्यतु। वायु०। सूर्य०। विष्णु०। प्रजापति०। विरूपाक्ष०।
सहस्राक्षस्तृप्यतु। शब्देन प्रत्येकं उदकांजलिं एकैकमुत्क्षिपेत्। सोमः। ब्रह्मा। वेदा।
देवाः। ऋषयः। सर्वाणि च छंदांसि। ॐकारः। वषट्कारः। महाव्याहृतयः। सावित्री। य

द्राः। द्यावापृथिवी। नक्षत्राणि। अंतरिक्षाणि। अहोरात्राणि। संख्या। संध्याः। समुद्राः। न
द्यः। गिरयः। सोमादिषु प्रथमांतेन विंशतिमंजलीं दद्यात्। नत्र प्युक्तशब्दप्रयोगः। क्षेत्रौ
षधिवनस्पतिगंधर्वाप्सरसः। इत्येकांजलिः। समस्तपदत्वात्। नागाः। वयांसि। सिद्धाः।
साध्याः। विप्राः। यक्षाः। रक्षांसि। भूतान्येवमंत्राणि तृप्यंतु। नागा इत्येवमादीनामष्टा
नां प्रत्येकमेकांजलिः। श्रुतिं तर्पयामि। स्मृतिं तर्पयामि। धृतिं त०। रतिं त०। गतिं त०। म
तिं त०। श्रुतिं त०। इत्यादीनां षण्णां पृथगेवांजलयः। श्रद्धामेधेधारणां च। गोब्राह्मणं।
इतित्रयोंजलयः। स्थावरजंगमानि सर्वभूतानि तृप्यंतु। इति एकोंजलयः। पृथि ५६
व्यां। ततः। तेन एकोंजलयः। एवमेव षट्चत्वारिंशदुदकांजलीन्। अरत्निमात्रसुहृद्यो

क्षिपेत्। इति यज्ञोपवीती। अथ प्राचीनावीती पित्र्यादिमीक्षमाणः तान्ने दर्भान्द्विगु
णीकृत्य दक्षिणामुखः सन्। पितृतीर्थेन। ऋषयः। शतर्चिनः। माध्यमाः। गृत्समदः।
विश्वामित्रः। जमदग्निः। वामदेवः। अत्रिः। भरद्वाजः। वसिष्ठः। प्रगाथाः। पावमानाः।
न्राणर्चिन इत्येवमादयः एकादशमंत्राः प्रतिमंत्रमेकैकोंजलयः। क्षुद्रसूक्तमहा
सूक्ताः। इति समस्तपदो मंत्रः। तेन एकोंजलिः। आचार्याः सुमंतुः। इति एको मंत्रः। ए
कोंजलिः। जैमिनिवैशंपायनपैलसूत्रभाष्यगार्ग्यबभ्रुबाभ्रव्यमंडुमांडव्याः। जै
मिन्यादिभिर्नवभिः पदैः कृतसमासत्वात् एको मंत्रः। तेन एकोंजलयः। गार्गी। वाच
क्नवी। वडवा। प्रातिथेयी। सुलभा। मैत्रेयी। गार्ग्यादयः षट् मंत्राः प्रत्येकमंजलिः। क

ह्वलं। कौषीतकिं। महाकौषीतकिं। सुयज्ञं। शांखायनं। आश्वलायनं। ऐतरेयं। महै
तरेयं। भारद्वाजं। जातूकर्ण्यं। पैंग्यं। महापैंग्यं। बाष्कलं। गार्ग्यं। शाकल्यं। मांडूकेयं।
महादमत्रं। औदवाहिं। महौदवाहिं। सौयामिं। शौनकिं। शाकपूणिं। गौतमिं। कहो
लं इत्येवमादयो द्वितीयां तास्त्रयोविंशतिमंत्राः तैरपि प्रतिमंत्रमंजलिं दद्यात्। ये
चान्ये आचार्यास्ते सर्वे तृप्यंतु। इत्येको मंत्रः। तेन एकोंजलयः। एवं चतुश्चत्वारिंशदं
जलीन् पित्र्येण तीर्थेन उत्तरे रुः क्षिपेत्। प्रतिपुरुषं पितरः अद्येति पितरस्त्रीन् स्त्रीन्
अंजलीन्। तथा। मातॄणां मातामहानां मातामहीनां च त्रीस्त्रीनंजलीनिति छंदोगप ५२
रिशिष्टस्य पृष्टमुक्तं। स्मृत्यर्थसारे चंद्रनिबंधनदावपि च। स्त्रियश्चैकैकमंजलिमिति सा

पत्न्यमातृविषयं। तथा। दौहित्रैर्धनिनः श्रेष्ठकार्यस्तत्र नयैथेति वचनात्। दौहित्र
स्य औरसपुत्रस्य तुल्यं। तथा। गोत्रः पिता अमुकशर्मा तृप्यत्वित्यंजलीन् क्षिपेत्।
पुंसां एवं। तथा। स्त्रीणां नामस्थाने तु देविदा तथा च स्मृतिः। एकैकस्यं जलैर्मिश्रान्
त्रीस्त्रीन् दद्यात्स जलांजलीन्। अमुकसगोत्रः पिता अमुकशर्मा तृप्यतु। ३। तथा। गो
त्रः पितामह ३। प्रपितामह ३। गोत्रा माता अमुकी देविदा तृप्यतु। एवं पितामही प्र
पितामही च ३। तथा। अमुकसगोत्रः मातामह अमुकशर्मा तृप्यतु। एवं प्रमाता
मह वृद्धप्रमातामहः। अमुकसगोत्रा मातामही अमुकी देविदा तृप्यतु ३। एवं प्रमा
तामही वृद्धप्रमातामही च ३। एवं पितृव्यकपितृव्याणीत्येष्ठभ्रात्रादीन् यथासंबं

धंपितृवंशाद्भवान्।तथामातुलमातृष्वसृप्रभृतिकान्यथासंबंधंमातृवंशान्
तर्पयेति।अन्यानपिसखिसंबंधिगुर्वादीन्स्नेहवशात्तर्पयेति।येषामपिअधि
कारीस्यात्तेषामपितर्पणंकरोति।तिलजलांजलिं।विशेषः।जलांजलिंततोदद्याद्भु
येन्येत्वसंस्कृताः॥असंस्कृतानांसर्वेषामेकमेवजलंदेक्षिपेत्।तदेतत्कवस्त्रेश्चैतत्पि
तृवंशास्तृप्यंतु।मातृवंशास्तृप्यंतु।अथकुशाग्रक्षेपमंत्रः।येषांनचपिताभ्राताना
पुत्रोनान्यगोत्रिणः।तेसर्वेतृप्तिमायांतुमयोत्सृष्टैःकुशोदकैः।इतिदर्भाग्रक्षेपः।तत
सव्यं।आचमनं।अथनिवीती।उदङ्मुखःदर्भान्गृहीत्वा।कायतीर्थेनसनकादीन् ५८
तर्पयेदिति।द्वौद्वौअंजली।ॐसनकस्तृप्यतु।सनंदनस्तृप्यतु।सनातनस्तृप्यतु।वो

ढुस्तृप्यतु।आसुरिः।कपिलः।पंचशिखः।येचान्येआचार्यास्तेसर्वेतृप्यंतु।वामपाणि
तलेमूलंकृत्वास्यायंतुदक्षिणे।मनुष्येभ्योजलंदेयंतूमोक्षवाङ्नतुतौ।इति।तत
सव्यमाचमनं।अन्यत्रदर्भान्गृहीत्वा।आब्रह्मस्तंबपर्यंतंजगत्तृप्यंत्वितिकवन्
जलांजलित्रयंदद्यात्।इच्छयापुरुषसूक्तेनतर्पणं।ततोआचम्यस्नानवस्त्रनिःपी
डनं।तत्रमंत्रः।वामदेवः।पितरोऽनुष्टुप्।अस्मत्कुलेतुयेतुयेजाताअपुत्रागोत्रि
णोमृताः।तेगृह्णंतुमयादत्तंवस्त्रनिःपीडनोदकं।ततःॐतत्सत्।इतिप्रयोगः।प
राशरः।जलमध्येतुयःकश्चिद्द्विजातिर्ज्ञानदुर्बलः।निःपीडयतियोवस्त्रंस्नानंतस्य
वृथाभवेत्।द्वादश्यांपंचदश्यांचसंक्रांत्यांश्राद्धवासरे।वस्त्रंनिःपीडयेन्नैवनच

द्वारेण योजयेत्। एवं यः सर्वभूतानि तर्पयेदन्वहं द्विजः। स गच्छेत्परमं स्थानं तेजो
मूर्त्तिरनामयम् इति स्नानतर्पणविधिः। अथ योगीश्वरः। यदेतद्विस्तरेणोक्तः स्नानस्य
विधिरुत्तमः। असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते। पराशरः। न तीर्थख्याकुले
स्नायान्नासज्जनसमावृते। दर्भहीनो ह्यविज्ञस्तु न नद्यां न शिरो विना। तथा नैकवासाः
क्रियां कुर्यात्स्नानकर्म विना क्वचित्। हस्तीमिवावगाहेत यावक्लादशुचिर्नरः। आच
म्य च यतः पश्चात्स्नानं विधिवदाचरेत्। विधिवत्प्राणायामप्रयोगं पूर्वकं यथासंभ
वं सूक्तहोमयादिना आपोहिष्ठादिभिरब्धे वरुणैरिमंमेगंगेति चांतर्ज्जले मार्ज्जनं। द ५९
क्षः। स्नानमंतर्ज्जले चैव मार्ज्जनं च। अघमर्षणं। ऋतंचेतिच सूक्तेन त्रिरावृत्येन नित्यशः।

आप्लुत्याचम्य विधिवत्स्नानांगं तर्पणादिकं। आदिशब्दात्स्वशाखोक्तं संध्यत
र्पणं च। तथा च गोभिलः। यः स्वशाखोक्तमुत्सृज्य परशाखोक्तमाचरेत्। अप्रमा
णमृषिं कृत्वा सोऽन्धे तमसि मज्जति। दक्षः। स्नात्वाचमेद्यदा विप्रः पादौ सवाज्जलेस्थ
तो। उभयोरथ संस्पृष्ट हस्ततः कार्यसिद्धिर्न भवेत्। अथ तीर्थगमनाशक्तश्चेत्गृहेषु
स्नानमाचरेत्। स्मृतिः। गृहे शीतोदकस्नानं बहिरुष्णोदकेन च। यः करोति न तस्य
स्य फलं किंचिन्न विद्यते। यमः। आपएव सदा पूतास्तासां वह्निर्विशोधकः। तस्मा
त्सर्वेषु कार्येषु उष्णांभः पावनं स्मृतं। तथा। आपः स्वभावतो मेध्याः किं पुनर्वह्नि
तापिताः। अतः संतः प्रशंसंति स्नानमुष्णेन वारिणा। व्यासः। शीतास्वप्सु निषिंचो

ष्ठा मंत्रतः पावनास्मृताः। गृहे पिशस्यते स्नानं स्मृत्वा देवनदीस्तथा। गंगे च यमुने
चैव गोदावरी सरस्वती। नर्मदे सिंधु कावेरी जलेस्मिन्संनिधिंकुरु। प्रादौमुखो
प्रक्षाल्याचम्य शिखांस्पृष्ट्वोत्। कालज्ञानं ततः स्नात्वा ऽछंस्नानं समाचरेत्। गृह्ये
तर्पणविधिः। पात्रात्तु जलमादाय शुचिः पात्रांतरे क्षिपेत्। जलपूर्णेथवा गर्तेस्थि
से.४ वाथ सबर्हिषि। विधिः सर्वोपि पूर्ववत्। बोपदेवव्याख्या। तातांबात्रितयं सपत्नी
जननी मातामहादित्रयं सस्त्रिस्त्रीतनयादि तातजननी स्वभ्रातरः सस्त्रियः। ताताँ
बात्मभगिन्यपत्यधवयुक् जाया पिता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ ६०
तीर्थे तथा तर्पणे। मातृतर्पणानंतरं सापत्नमातुस्तर्पणं। एकोद्दिष्टविधिना। तथा।

जीवन्मातृकः पितामहीप्रपितामह्योः मातामहादीनां च तर्पणं कुर्यात्। तदुक्तं। समा
तै.२ तृकोनर्चयेत्री पितामहीप्रपितामही। तर्पयेत्तर्पणे दद्यात्पिंडान्मातामहीस्तथा। त
र्पणं पिंडदानं च विनास्वपतिभिःसह। तृप्तिं यांति सपत्नीको चारणा छांखायनोब्रवीत्।
तथा च स्मृत्यर्थं। पिंडान्पश्चिमेन तत्पत्नीनां किंचिदं तदुहायिता तर्पणाद्वा। प्रतिपुरुषं पित
र इति। मातरश्च पितरश्च पितरः। पितामातृत्वेकशेषः। भर्तारं अनुगच्छतीति। यच्च व
चनं। जनन्यां विद्यमानायां यजेद्यस्तु पितामहीं। मातृघ्नः स तु विज्ञेयो दर्शश्राद्धेषु प
र्वणे। इति पितामह्यर्चननिषेधकं। तत् मातृप्रथमनमचष्टका श्राद्धं। पितामहीप्र
भृतिन कुर्यात्। तर्पणममावास्यादावष्टकपिंडदानं च शांखायनवचनाद्भवति।

शांखायनीनां। किंच। स्नानकाले समायांति पितरो द्विजलार्थिनः। निराशा नागतानक्र
र्वंति श्रंधेतमसिमज्जति। परान्नाशारः पूजादिकां द्विणीये चये च केचिज्जलार्थिनः। आ
शान्नागधेयायेये चाक्लिक्रुतभागिनः। एवं वदंतानित्वानिस्थावराणि चराणि चाम
ध्यमक्षिवनिकांक्षंति तेषां तत्र प्रदीयते। इति। ततः उदकस्य दितिसमापनं। पावमानीश्च
जपति। अथ देवतार्चनं। आदौ आदित्याय अर्घ्यं ददाति। उक्तविधिना। अथ इष्ट
देवताश्चादेवादीनार्चयेत्। तत्र सौधतामिश्रमिच्छति इति। अग्नावधो हृदये सूर्ये स्थं
डिले प्रतिमासु च। षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतं। तत्र पूजयति। अथवा ६१
अन्यकल्पनी पात्रसहितो गृह नागत्य पूजयति। पुरुषसूक्तेन विष्णुमर्चयति। रुद्रम

र्चयति। इष्टदेवताश्च। शंभुः। विष्णुः। सूर्यः। शक्तिः। गणेशश्च पंचायतनं। अथ पं
चायतनं। तेषां स्थानक्रमः। शंभुमध्यगते हरीन इरम्ब देव्यो हरौ शंकरे भास्येना
गसुता रवौ इरगणेशाजा बिकास्थापिता। देव्यां विष्णु हरैकदंत रवयो लंबोदरे
जेश्वरेनायाः शंकरभागतोतिसुखदा व्यस्तास्तु तेऽहानिदाः। अनेन क्रमेण पूजि
तासुखदा। इति पंचायतनमध्ये यः मुख्यस्वरूपेण पूज्यते स मध्ये स्थाप्यः। अपरे च
वारो यथोक्तेन प्रकारेण ईशानकोणादारभ्य चतुःकोणेषु स्थापनीयाः। तदुक्तं स्व
स्थानचलिता देवा दुःखशोकभयावहाः। देवाः पाषाणरूपे चलत्वस्वरूपं च कथं प्राप्ता
इत्युच्यते इति। पूर्वं तावत् अस्मिन् लोके जनये देवमनुष्या आसुः पाषाणत्वकार

णंतु। गिरिजासुतजन्मार्थं जाता विघ्नकराः सुराः। तद्वृत्तं चरितं देव्या शापो दत्तोति
दारुणः। पार्वतीशापसंयुक्ता देवा आश्रमं च मागताः। विष्णुना शंकरेणापि तथैवान्यैः
सुरोत्तमैः। संस्कृता वरदा जाता पाषाणा वै पिनो सुराः। स्वस्थाने पूजयिष्यंति पुरु
षार्थचतुष्टयं। दातुं समर्था मिष्टाक्यादेष एव वरोत्तमः। स्वर्गलोकं ततो जाता बध्म
स्वर्गादिकांतनुं। आदितो द्वेन रौ ष्यता आदि। अतो देवमूर्त्तिः पूजा। अष्टत्रिंशत्
षोडशद्वादशपंचस्त्वपचारकैः। आसनं। आवाहनं। उपस्थानं। सानिध्यं। आभिमु
ख्यं। स्थिरीकरणं। प्रसादनं। अर्घ्यं। पाद्यं। आचमनं। मधुपर्कं। उपस्पर्शनं। स्नानं। ६२
स्नानांते आचमनं। नीराजनं। वस्त्रं। वस्त्रांते आ०। यज्ञोपवीतं। यज्ञोपवीतांते आ०॥

अलंकारः। गंधादर्पणं। पुष्पाणि। धूप। दीप। भोजनं। पानीयं। आचमनं। हस्तवासः।
तांबूलं। अनुलेपः। पुष्पदानं। गीतं। वाद्यं। नृत्यं। स्तुतिः। प्रदक्षिणा। पुष्पांजलिः। न
मस्कारः। देवप्रीत्यै अष्टत्रिंशात्मकाः। षोडशप्रकारपूजनं पूर्वैः सूक्तं। अथ द्वाद
शप्रकाराः। स्नानार्धं पाद्याचमनमधुपर्कं चिमनान्यपि। गंधपुष्पं चनैवेद्यं तांबूलं
चंदनं यथा। मंडनानीति द्वादश। अथ पंचोपचारपूजा। गंधपुष्पे धूपदीपौ नैवे
द्यं पंच मं स्मृतं। एते चत्वार्थाकि थिता यथासंभव माचरेत्। पुष्पाणि स्वयमानीय पू
जयेद् देवताद्विजः। बिल्वपत्रं शमीपत्रं पंचं भृंगारकस्य च। मालतीकेशपद्मं चसध
स्कृतिकरं हरेः। तथा। उत्तमा वनजा पूज्ञा क्रयक्रीता तु मध्यमा। अधमा याचिता प्र

ज्ञाचौर्येण वस्तु निष्फलं। घृतं पर्युषितं चैव केशकीटसमन्वितं। लालास्वेदसमाकी
र्णं उच्छिष्टस्पर्शदूषितं। पुष्पं दुर्गंधि दुर्वर्णं कुसुमं च विवर्जयेत्। तुलसी पर्युषिता नै
व बिल्वं च त्रिदिनावधि। पद्मं पंचदिनात्त्याज्यं शेषं पर्युषितं भवेत्। माकंदं मचकुंदं च
जलजं च सितासितं। मरुकं दमनं चैव वसंते च प्रशस्यते। आषाढे सर्वदेवानां शस्यं
त्विव कदंबकं। दूर्वांकुरैरर्चयित्वा सर्वान्कामानवाप्नुयात्। पात्र पुष्पार्थं वनस्पति प्रा
र्थनं। मा विषादं कुरुष्व त्वं स्थानत्यागं च मा कुरु। देवतापूजनार्थाय प्रार्थयामि वनस्प
ते। तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये। केशवार्थे विचिन्वामि वरदा भव शोभने। ६३
पश्चात्पूजा कार्या उदकप्रवर्तनं यतः। आदिकल्पे ह्यब्मयं पूर्वं विश्वमजायत। देवा ह्य

प्स्वरूपेण जातास्तोयेन वर्द्धिताः। जीवनं सर्वलोकानां तस्मात्तोयं सुरप्रियं। उक्
तिः सर्वलोकानां तोयादन्नस्य संभवः। इति। ततः गांधर्वं चंदनं प्रोक्तं गंधर्वगीत
तत्पराः। गीतं सर्वप्रियं तस्माद्विना कस्तूरिकादिभिः नकर्दमार्चनं श्रेष्ठं मुक्त्वा यक्षा
ख्यकर्दमं। कस्तूरिकाया द्वौ भागौ द्वौ भागौ कुंकुमस्य च। चंदनस्य त्रयो भागा यक्षक
र्दम उच्यते। अथ। बिल्वापामार्गदूर्वा च तुलसी च शमी तथा। एताः पंच प्रशस्या
स्युः सर्वकालेषु सर्वदा। गुग्गुलादिकनिर्यासैः सुगंधागरुणा तथा। धूपं दद्यात्त
था दीपं नैवेद्यं घृतसंयुतं। अथ विष्णोः हृष्टाहृष्टमयं विष्णुं श्रीकान्तास्तु तुलसी तदा
तयोर्योगः सुखकरो विष्णोः क्षीराब्धिवासिनः। शेषतल्पे शयानस्य तच्छ्वासोच्छ्वाससंग

माध्वासंतप्तो विग्रहस्तस्य तत्रांत्यै पंकजं प्रियं।तथा।कमलच धत्तूरनकं तस्मात्सर्वोम
रप्रियं।कलिकामुकुलैर्नैषिं विनापंकजचंपकैः।नाद्यातेरर्चयेद्विष्णुं तथा चोन्मत्तपु
ष्पकैः तथा।शंखे तीर्थोदकं कृत्वा यः स्नापयति केशवं।बिंदुमात्रेण ह्यादत्यां कुला
नां तारयेच्छतं।शंखमध्ये गतं तोयं भ्रामितं केशवोपरि।वंदते शिरसा नित्यं गंगास्ना
नं दिने दिने।त्रयो देवास्त्रयो वेदास्तिस्त्रः संध्यास्त्रयोगुणाः।तुलसीमस्तके यस्य तस्यै
तिमंगलप्रदा।तथा।धत्तूराक्षौतंडुलैश्च रक्तपुष्पं जपादिकं।गृह्णोद्भवैः करवीरैश्च नक्त
यात्पूजनं हरेः।इति विष्णुपूजा।अथ रुद्रपूजा।कुंडेडालाड्ग्लं यस्मात्सर्पस्त्विषितवि ६४
ग्रहः।तस्मात्तत्तापशांत्यर्थं पंकजं शिववल्लभं।केतकीकरवीरं च रक्तं चैव जपादिकं

चैव२

।वर्ज्यं येच्छिवपूजायां सिंदूरं कुंकुमानि च।अर्कधत्तूरकौ विष्णुबुद्धिकराणि च।सर्पा
क्रांदकराण्येव शिवपूजा च तेऽशुभाः।अशुद्धपात्रपाणीर्वा सोनिःकृष्टिताल्मनि। णिर्वा२
आनीतं नार्पयेच्छंभोः प्रमादादपि दोषकृत्।इति।अथ सूर्यपूजा।जपापुष्पं तथा
रक्तकरवीरादिकं च यत्।रक्तं पुष्पं हितं सूर्ये वर्जयित्वाकुरंटकं।तगरं बिल्वप
त्राणि सुवर्णकुसुमानि च।वर्जयेत्स्नानवेनित्यं बंधूकं बर्वरीं तथा।अथ शाक्ति
कमलं तंत्रातपत्रादीनि प्रशस्तानि।अथ वर्ज्यानि।तुलसी दूर्वा अर्कमंदाराणि।न
नां दाशिरिज्ञायस्मात्तयोर्वैरं परस्परं।तस्मात्श्रीतुलसीं नेष्टा पूर्वा तत्फलन्मकारणा
त्।तथा।न दूर्वयार्चयेदुर्गा बिल्वपत्रै दिवाकरं।देवानां चार्कमंदारैर्वादित्ये तगरं।

तथा। अथ गणेशः सर्वाणि शुभानि। अथ जननां द्वेषिणीमत्रागणेशस्कन शीत्य
र्जितः सुधमयोगास्समुद्भूताउ र्वांगणपतिप्रिया। तथा। नाक्षतैरर्चयेद्विष्णुं न तुलस्या
विनायकं। शिवे विवर्जयेत्कुंदं उन्मत्तं च हरेः सदा। शाल्मलैर्नकमालैश्च कुटजै
श्च कुरंटकैः। अन्नाभिलाषि देवांश्च नार्चयीत कदाचन। तथा। शयनीबोधनीम
ध्येशाम्याभिर्वार्चयेत्सुरान्। पद्मैर्भृंगारकुंकिरात्मैर्नार्चयेद्दक्षिणायने। तथा। धत्तू
रकुसुमशीपत्रैः स्तिलदर्भप्रसूनकैः। गणेशार्चविदूर्वाभ्यः प्रयत्नेन विवर्जयेत्। त
था। इस्तात्प्रस्खलितं क्षितौ च पतितं जर्म्मं कदापादयोयन्मूर्ध्नि विधृतं धृतं च वस ६५
नावनाभेरक्षेयकृतं। स्पृष्टं दुष्टजनैर्हिनिरूपहतं यद्दूषितं कीटकैः स्त्त्याज्यं कुसु

दे।
मं फलं दर्शं च लंभक्तैः शिवप्रीतये। शिव इति सर्वदेवतोपलक्षणं। इत्यक्षे नामा
चतः पुष्पाणि पूजा विधिश्च। यथा शक्त्या दंडवत्प्रणामान्करोति। यद्यप्येता निन्न
निधन देवताः तथापि परमार्थतः एक एवास वन्हितात्मा एकः तर्हिन्हतयोन्यादे
वताः एताश्च। तदप्युक्तं इहचोक्तं। इंद्रं मित्रं वरुणम॰ स्न च १। तस्मात्तु मुमुक्षुस्त्व ब्र
ह्मार्पणबुध्यस कर्मकृद्वन्हि विष्णुमेवध्यायेत्। उत सत्तवाचारंभणं विकारो नामधे
सत्य३ यं चात्तमृत्तिकेत्येव सत्यमित्यादि। तत्त्वमसीत्यादि महावाक्याद्वबोधेन गुरूपदिष्टेन
साकारं निराकारं वा ध्यायेत्। मुखेनाम हृदि ध्यानं। निवेद्यमुदरे हरेः पादोदकं
स निर्माल्यं मस्तके यस्य सोच्युतः। इति। विद्वान्नागरविप्रमुख्य॰ अयं प्रवेवतक्ष

कः। द्विवेदेनाचलेनोक्तो मडोडेनाग्निहोत्रिणा। स्वशाखाविहितः स्मार्त्तकर्मानुष्ठान
क्रमविवरणेऽभिवादनजीवनोपायतर्पणक्रम — तर्पणसंक्षेपस्नानगृ
हस्नानपितामहीतर्पणदेवपूजाविधिः। अथ पंचमहायज्ञांतर्गतं वैश्वदेवक
र्म्मविधीयते। पराशरः। अस्नाताशी मलं भुंक्ते अजपी पूयशोणितं। अहुत्वा
कृमीकीटानदत्त्वाश्वशाल्लं तथा। मनुः। पंचसूनागृहस्थस्य पेषण्यचउपस्करः।
खंडिनी चोदकुंभश्च पीड्यंते यास्तु वाहयन्। तासां क्रमेण सर्वासां निष्कृत्यर्थं म
हर्षिभिः। पंचप्रोक्ता महायज्ञाः प्रत्यहं गृहमेधिनां। शाखाग्नौ लौकिके वा। यस्मि ६६
न्नग्नौ पचेदन्नं तस्मिन्होमो विधीयते। लौकिके पापनाशाय वैदिके स्वर्गमाप्नुया

त्। तथा। कोद्रवं वरटं माषं मसूरं चकुलत्थकं। क्षारं च लवणं सर्वं वैश्वदेवे विव
र्जयेत्। तथा। शुष्कान्नेन भवेत्कुष्ठी अत्युष्णान्नेन दुःखितः। रूक्षान्नेन दरिद्रश्च
क्षाराम्लाभ्यामधोगतिं। पक्वं घृताक्तं हविष्यान्नं सुरभ्यं। दध्यक्तं पयसाक्तं वा। य
द्यपि बह्वन्यन्नानि साधितानि तथापि एकेनान्नेन विश्वदेवे कृते सर्वाणि निसं
स्कृतानि स्युः। इति मिताक्षरायां। स्मृत्यर्थसारे। पक्वाभावे प्रवासे च तंडुलांश्चौष
धीस्तथा। पयो दधि घृतं वापि कंदमूलफलादि वा। योन्ययेद्देवपूजादौ अन्नेन वा
थन्नपानजीनः। द्रव्यं स्वकं चाशितव्यं पाणिना कठिनं हविः। स्नातको ब्रह्मचारी च
पृथक्पाकी वैश्वदेवं कुर्यात्। स्त्री वा न कुर्यात् कारयेत्। होमाद्यशान्नरहितं नमो

क्षर्थं कदाचन। अविभक्तेषु संसृष्टेष्वेकेनापि ह्रतं तु यत्। देवयज्ञादि सर्वार्थं लौ
किकार्यौ ह्रतेयदि। इन्धनं चा फलं मूलं तांबूलं पयअपधं। मन्त्रयिचापि कत्तव्या
स्नानदानादिका क्रिया। तथा। अस्तते विश्वदेवे तु भिक्षुके गृहमागते। उद्धृत्य वैश्व
देवार्थं भिक्षां दत्वा विसर्जयेत्। भिक्षुको यतिः। अथ अग्निरहितस्य वैश्वदेवविधिः।
अन्नं व्याहृतिभिः हुत्वा हुत्वा मंत्रैश्च शाकलैः। भूतेभ्यश्च बलिं दद्यात्ततो श्नीयादन
ग्निमान्। वसिष्ठः। निरग्निकस्तु यो विप्रः सो न्नं व्याहृतिभिः स्वयं। हुत्वा शाकलमंत्रै
श्च निर्दिष्टं काकबलिं हरेत्। शाकलमंत्राश्च शांखायनसूत्रे। होमानुसारेण चतुर ६७
स्रं स्थंडिलं कुंडे वा गोमयेनोपलिप्ते दशाहादशांगुले वा कुंडे उदकदर्भैः संमार्ज्जनं।

समुत्क्ष्य उ गोमयेनोपलिप्य। उदकसंस्थां मध्ये लेखां लेषयित्वा समिधं तथा। उ
परिष्टाद्दक्षिणत एकां मध्ये एकां उत्तरत एकां ता अभ्युक्ष्य। पचनाग्निमाधाय उं
अग्निं प्रणयामि मनसा शिवेनायमस्तु संगमनो वसूनां। मा नो हिंसीः स्थविरं मा
कुमारं शं नो भव द्विपदे शं चतुष्पदे। अग्निं प्रणीय ह स्तीवा। प्रदक्षिणमग्नेः सम
तात्पाणिना सोदकेन त्रिः प्रमार्ष्टि समूहनं। ततः त्रिः पर्युक्षणं। पर्युक्षणेन च अ
ग्नेः सन्मुखी क्रियते। प्रागग्रं समिधमाधाय। विश्वामित्रो ग्निर्गायत्री। भूः स्वाहा॥
इदमग्नये न मम। जमदग्निर्वायुरुष्णिक्। ओं भुवः स्वाहा। इदं वायवे न मम। भर
द्वाजः सूर्योनुष्टुप्। ओं स्वः स्वाहा। इदं सूर्याय न मम। ब्रह्मा प्रजापतिः। ओं भूर्भुवः स्वः

स्वाहा।इदंप्रजापतयेनमम।ॐआत्मस्तुतस्यैनसोवयज्ञनमसिस्वाहा।मनुं०हा।ॐ
पित्रॄस्तुतस्यै०यबाह्मे०हा।शाकलानां।इदमग्नयेनममेति।प्रजापतयेस्वाहा
इयंदेवपत्नीनामाकूतिः।तथाचअत्रिः।प्रजापतिःस्विष्टकृच्चपत्नीनामाकूतिर्दे
यो।वामदेवोग्निःस्विष्टकृत्।ॐअग्नयेस्विष्टकृतयेस्वाहा।इदमग्नयेस्विष्टकृतेनमम।
उदकोपस्पर्शनं।उपरिष्टसमिधमाधायपर्युक्षणं।सोदकमन्त्रं।सर्वेभ्योदेवे
भ्योनमः।सर्वेभ्योभूतेभ्योनमः।ॐगृह्योक्तदेवताभ्योनमः।अथप्राचीनावीती।द
क्षिणतोदर्भानास्तीर्यशेषंनिनयति।ॐपितृभ्यःस्वधानमः।इदंपितृभ्यः।अथय ६८
ज्ञोपवीती।ततोविश्वदेविकंकर्मसमाप्यइंतकारादिकमिति।समापनंतथा।त्र्या

युषंजमदग्नेरित्यादिभस्मनात्रिपुंड्रंकरोति।तच्छंयोरावृणीमहइतिजपति।विश्वा
निनइतिहाभ्यांअग्निपूजनं।यस्मैत्वमित्युपस्थानं।आनोभद्राइतिजपः।नइं
नोअपिवातयमनः।विश्वानिदेवसवितरितिदंडवत्प्रणामः।ॐतत्सत्।इतिवि
श्वदेवोनिरग्निकस्य।अथनित्यश्राद्धादिकं।तथाशांखायनः।येअग्निदग्धाइ
पिदेवपितृनरेभ्योदद्यात्।श्रोत्रियंभोजयेत्।ब्रह्मचारिणेवाभिक्षांदद्यात्।अनंत
रंसौवासिनींगर्भिणींस्थविरांश्चभोजयेत्।तदनंतरंकाकबलिः।श्वभ्यःश्वपचेभ्य
श्चवयोभ्यश्चआवपेद्भूमाविति।यत्स्मेतत्तेइतिवायव्यांदिशि।इतिबहिर्बलिदा
नं।काकबलिरयं।शिष्टंकाकबलिंहरेदितिवचनात्।ततोगोग्रासः।शाखांतरी।

यः यमः॥ अस्तत्वा विश्वदेवं तु भुंजंते ये द्विजातयः॥ वृथा तेनान्नपाकेन काकयोनिं व्र
जंतिते। तथा च शांखायनः॥ नानवत्तमश्नीयान्नैकोन पूर्वं तदद्यात् दृष्टोक्तं। मोघम
न्नं विंदते अं दी॥ इ १ तथा च स्मृतिः॥ बालस्ववासिनी वृद्धगर्भिण्यातुरकन्यकाः॥
संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनं। तत्रापि। पत्नी यावन्न भुंजीत तावद
न्नमगाहितं। तस्यास्तु भोजनादूर्ध्वं अन्नं शेषं प्रकीर्तितं। देवपितृनरेभ्योदत्वादेव
दानं विश्वदेवो बलिदानं। पितृदानं नित्यश्राद्धविधिनो विधिना श्रोत्रियं भोजये
त्। भोजनाशक्तौ ब्रह्मचारिणे भिक्षां दद्यात् पितृभ्य उद्देशेन नरदानं तु मनुष्योद्दे ६९
शेन अतिथिभोजनं हंतकारं वा। ग्रासमात्रा भवेद्भिक्षा चतुर्ग्रासं तु पुष्कलं पुष्कल ना

णि तु चत्वारि हंतकारः प्रकीर्तितः॥ एवं पितृदेवनरेभ्यो दत्वा। अथ नित्यश्राद्धं।
एकमप्याशयेद्विप्रं पित्रर्थे पंचयाज्ञिके। तत्र षट्पौरुषं ज्ञेयं विश्वदेवविनि
र्जितं। स्मृत्यर्थसारे। नित्यश्राद्धे अदैवतं। अव्रतं च अपिंडं च अब्रह्मचर्यं च ति॥
नागरखंडे। नित्यश्राद्धं न कुर्वीत प्रसंगाद्यत्र सिध्यति। पितामहश्राद्धं माताम
हानां तृप्त्यर्थं नित्यश्राद्धं कर्त्तव्यं। अत्र पितरः सपत्नीकाः मातामहाः सपत्नीका इति
योज्यं। पितरो यत्र पूज्यंते तत्र मातामहा अपि। अविशेषेण कर्त्तव्यं विशेषान्नरकं
व्रजेत्। इति वचनात्। विष्णुधर्मोत्तरात्। कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा
शाकमूलफलैर्वापि पितॄणां तृप्तिमाहरन्। वदंतः पुरुषे लोके स्तदन्नास्तस्य देव

ता इति। तदन्नात्पितॄणामुद्देशेन किंचिदन्नं दद्यादिति। पदार्थत्रयेणापि नृयज्ञः
सिध्यति। पितृतर्पणं। विश्वदेवांते पितृभ्यः स्वधा नम इति नित्यश्राद्धं च। यदुक्तं म
छपुराणे। जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः। ब्राह्म्यं हुतं द्विजाग्र्येषु प्राशि
तं पितृतर्पणं। जपो ब्रह्मयज्ञः अहुतो महायज्ञोऽयं। हुतो महायज्ञो होमः। विश्व
देवः देवयज्ञो ब्राह्म्यः प्रहुतो महायज्ञो भौतिको बलिः भूतयज्ञ इति। तदंते पि
तृभ्यः स्वधा नम इति द्विजाग्र्येषु प्राशितं। नित्यश्राद्धतर्पणं च। एतत्पदार्थत्रयात्म ७०
कः पितृयज्ञः अत्र द्विजाग्र्येषु इति बहुवचननिर्देशान्नृयज्ञः पंचमो महायज्ञः
सूचितः यथा। ब्रह्मयज्ञो देवयज्ञो भूतयज्ञस्ततः परः। पितृयज्ञो नृयज्ञश्च पंच

आगते अतिथौ अयं नियमः। अनागते न दोषः। उत्तमेषूत्तमं कुर्याद्धीने हीनं स
मे समं। यतौ तु। यतेर्हस्ते जलं दद्याद्भैक्षं दद्यात्पुनर्जलं। तद्भैक्षं मेरुणा तुल्यं त
ज्जलं सागरोपमं। देवपितृमनुष्येभ्यो देयमन्नं तथा जलं। स्वाध्यायमवहं कुर्या
न्न पचेदन्नमात्मने। सूतकेपि कुटुंबार्थे पचेदन्नं न चात्मने। भुंजीयातां ततः पश्चा
दवशिष्टं तु पंचमीती। ती। कुटुंबं भोजयित्वा तो भुंजीत गृहमेधिनी। तस्याः स्कभोज
नाद्धर्ममन्नशेषं प्रकीर्त्तितं। कुर्यात्पंच महायज्ञान्नित्यशः सूतकं विना। नित्यनै
मित्तिकं वाप्यन्यत्कर्मापि न हापयेत्। स्वकर्महानौ पतनं अत्रेर्वचनाद्यदि स्व
गो१ कर्महानौ नास्तिक्यान्मासेन पतनं स्मृतं। द्वादशाहे तेनैव तस्य शुद्धिरुक्ता नान्यथा।

तंनिरीक्ष्यार्कमीक्षेतस्पर्शेऽस्मिन्नानंसचैलकं। पराशरः। पंचतीर्थानिविप्रस्यकरेति
ष्ठंतिदक्षिणे। ब्राह्म्यंदैवंतथापित्र्यंप्राजापत्यंचसौमिकं। अंगुष्ठमूलेब्राह्म्यं। अं
गुल्यग्रंदैवं। प्रदेशिन्यंगुष्ठमध्येपित्र्यं। कनिष्ठिकयामूलेप्राजापत्यं। मनुष्यंच
मध्येसौम्यं। अग्नितीर्थंच। मार्जनदेवार्चनबलिदानपर्युक्षणभोजनदेवतात
र्पणनित्यहोमादीनिदेवकर्माणिदेवतीर्थेनकुर्यात्। पितृतर्पणादिपित्र्यंकर्म
पितृतीर्थेनकुर्यात्। मनुष्यतर्पणनिर्वपणलाजाहोमादिप्राजापत्येन। दैविकं
वाकमंडलुस्पर्शनंदधिप्राशनंनवान्नप्राशनंस्रुक्स्रुवग्रहणंदैविकंचसोमेन। आ ७२
ग्नेयेनप्रतिग्रहणंकुर्यात्। आचमनं। ब्रह्मतीर्थेनदैवनकायेनवा। कुर्यादि

रहश्चैवंसम्यक्ज्ञात्वाविधानतः। समाप्नुयाद्गृहस्थोपिब्रह्मणःपदमव्ययमिति।
पराशरस्याह। अथदुष्टस्थानस्थितानांग्रहाणांहोमविधिः। स्वराशिमवलंब्या
यच्छुभाशुभविचारणा। एकादशस्थानेसर्वेग्रहाःशुभाः। यथा। रविःषष्ठस्तृती
यश्चदशमेकादशःशुभः। सोमःषष्ठस्तृतीयश्चजन्मस्थोदशमःशुभः। एकाद
शश्च। भौमःषष्ठस्तृतीयश्चदशमैकादशःशुभः। बुधस्तृतीयःपंचमःसप्तमे
कादशस्तथा। गुरुर्द्वितीयोनवमःपंचमःसप्तमःशुभः। एकादशश्च। शुक्रस्तृ
तीयःसप्तमःपंचमेकादशःशुभः। शनिस्तृतीयोनवमःपंचमःसप्तमःशुभः॥
एकादशश्च। राहुःषष्ठस्तृतीयश्चनवमोदशमस्तथा। जन्मन्येकादशेचशुभः। रा

डोश्वसप्तमस्थाने केतुस्थानं प्रकीर्त्तितं। ग्रहश्चेपि च केतूनां न शुभो नाशुभो मतः।
एते शुभाशुभाः तद्व्यतिरिक्तस्थानस्था अशुभाः। अशुभानां ग्रहाणां चन्द्रमादेव
तानां च प्रत्यहं दुरितनिवृत्तये महोदयाय च यथाविधिः व्रीहिमिश्रैस्तिलैः समिश्रैर्वा
प्रातःकालादारभ्य भोजनात्पूर्वं यथासंभवसंख्ये पतो होमः कार्यः। शालाग्नौ लौकि
काग्नौ वा विश्वदेवान्तु यथाग्निसंस्थाप्य परिसमूहनपर्युक्षणं समिधमाधाय च।
पूर्वं चतुर्निर्द्दिष्टाहुतिभिः स्वाहाकारान्ते प्रणवाद्यैर्होमः। ततो गणेशस्य गणानां त्वे
ति। ततः वास्तोष्पत इति वास्तोष्पतये। ततो ग्रहाणां ग्रहदेवतानां च। पूर्वं तु देव ७३
तं सर्वत्रेति वचनात्। आदित्यादयो ग्रहाः प्रसिद्धाः। ग्रहदेवताश्च अनुक्रमेण। अ

ग्निरापो धरा विष्णुरिन्द्र इन्द्राणी प्रजापतिः। सर्पा ब्रह्म तथा ब्रह्मा ग्रहाणां देवताः स्मृ
ताः। तासां मन्त्राः स्युः। अग्निं दूतमप्सु मे स्योना पृथिवी इदं विष्णुरिन्द्रश्रेष्ठानी इन्द्राणीमा
सु ना प्रजापत आयं गौ ब्रह्मजज्ञानमिति देवतामन्त्राः। आकृष्णेनाप्यायस्वाग्नि
र्मूर्द्धा उद्बुध्यध्वं बृहस्पते अति शुक्रः शुशुक्वा शमग्निरग्निभिः कयानश्चित्रः के
तुं कृण्वन्निति ग्रहमन्त्राः। एतेषां ऋषिदेवतछन्दांसि अनुक्रमणिकातो ज्ञेया
नि। ब्रह्मजज्ञानमित्यस्य प्रजापतिधर्मतनुस्त्रिष्टुप्। ततः जातवेदस इति जातवे
दसे। त्र्यंबकमिति रुद्राय। ब्रह्मणस्पते त्वमिति ब्रह्मणस्पतये। इदं विष्णुरिति वि
ष्णवे। तत्सवितुरिति सावित्र्या। ततः उद्बुध्यमिति ऋचेन होमः। अन्त्यो हविःशिष्टु

मइति इदं सूर्याय शत्रुघ्नये। उदकोपगततो दिक्पालमैत्रैर्होमः दिक्पालानां। त
तः अग्नये स्विष्टकृते इति। उदकोपगततः समिधमाधाय पर्युक्षणं। एवं च यदा
यदा आत्मानं संकीर्तितं पश्यति। तदा विशेषतो होमः कार्यः। ब्राह्मणभोजनं च दा
नं च। अथ भोजनविधिः। तावत् भोजनं च मिंदुगोमयेन मृदासह। वारिणा वा
पि कर्तव्यं मंडलं शुभकर्मसु। आदित्या वसवो रुद्रा ब्रह्मा विष्णुः प्रजापतिः। मंडला
न्युपजीवंति तस्मात्कुर्वीत मंडलं। यातुधानाः पिशाचाश्च राक्षसा असुरास्तथा।
घ्नंति बलमन्नस्य मंडलेन विवर्जितं। चतुःकोणं ब्राह्मणानां क्षत्रियाणां त्रिकोण ७४
कं। मंडलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतं। अग्निहोत्रिमासनं शुभं गृहस्थस्य च

तुःपदं। गोत्रान्मयपोडवद्ध्य अर्कपलाशादिवर्ज्जं। श्रीपर्ण्यादिप्रशस्तं। पैठी
नसिः ब्रह्मपत्रेषु योऽनुक्ते मासमेकं निरंतरं। त्रिनिश्चांद्रायणैः स्नक्ष्यं महापात
कनाशनं। सौवर्णे राजते ताम्रे पद्मपत्रपलाशयोः। भोजने भोजने चैव त्रिरात्रफ
लमश्नुते। ताम्रगृहेण यतिब्रह्मचारिविषयं। विधवानां च पलाशादिपत्रासंभवे।
क्वचित्पलाशमध्यपत्रनिषेधे भोजने। तत्र वद्भीपलाशविषयः पुराणेषु॥
पलाशेषु च पत्रेषु मध्यमेषु च भारत। यः करोत्यन्नपानं तस्य प्राजापत्यं दिने दिने।
भवतीति। अथ निषिद्धानि। वटार्कार्श्वत्थपत्रेषु कुंभीतिंदुकपत्रयोः। कोविदार
करंजेषु भुक्त्वा चांद्रायणं चरेत्। स्नाततेजसे मृन्मये नेति। तथा। एकएव सदानुं

केयः कांस्ये विमलेन नरैः। भोजने भोजने चैव भाजनापत्यं न वेदिति। आयुः प्रज्ञाय
शो बुद्धिरन्यस्मै चेन्न दापयेत्। विधवा ब्रह्मचारीणां कांस्ये भोजनमनिषिद्धं। यते
स्तेन्नसनिषेधात्। यच्च। आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः। श्रियं प्रत्य
ङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः। तत्काम्यविषयं। प्राङ्मुखोन्नानि भुंजीतेति नि
त्यविधिः। उदङ्मुखो वा पित्र्ये भोजने उदङ्मुख एवा मनुः। आर्द्रपादस्तु भुंजीत
नार्द्रपादस्तु संविशेत्। आर्द्रपादस्तु भुंजानो दीर्घमायुरवाप्नुयात्। पादयुगं
अंगपंचकोपलक्षणार्थं। तत्र व्यासः। पंचार्द्रो भोजनं कुर्यात् प्राङ्मुखो मौनमा ७५
स्थितः। हस्तौ पादौ तथैवास्यमेषु पंचार्द्रता मता। मार्कंडेयः। नैकवासास्तथाश्नीया

द्भिंडभांडेन वा पुनः। अनार्द्रपाणिपादश्च तथैवानार्द्रमस्तकः। भिन्नभांडे भग्न
कांस्ये। सुवर्णादिन भंगदुष्टं। आर्द्रमस्तकं तत्र शिरसः अन्यक्षालनमात्रे संपा
दनीया। आर्द्रशिरा न चाश्नीयात् इत्यायुर्वेदनिषेधात्। तथा। यस्तु भोजनवेला
यामासनमुपस्पृशेत्। ब्राह्मणो भोजनात्पूर्वं तमाहुः पंक्तिदूषकं। भोजनार्थमु
पविशेन्न बहिरासनमध्यवासने। एकपंक्त्युपविष्टास्तु न स्पृशेयुः परस्परं। एकपंक्त्यु
पविष्टानां विप्राणां सह भोजने। यद्येकोपि त्यजेत्पात्रं नाश्नीयुरितरे जनाः। अस्तु
वा पंक्तिभेदं तु डुःस्तंय दुरात्मनां। सर्वेषां तत्समं तावद्यावत्पंक्तिर्न भिद्यते। अग्नि
ना भस्मना वापि तृणेनाप्युदकेन वा। द्वारेण चैव मार्गेण पंक्तिभेदः प्रकीर्तितः। न

स्म-मर्यादा नागरद्विजातीनां निषिद्धा। तदुक्तं नागरखंडे। अनग्निरग्नौकरणं
द्धयाहि पिच पार्वणं। कुर्वन्ति स्म मर्यारेखां नागरीयां त्यधेगतिं। उद्धृत्य वामहस्ते
न तोयं यः पिबते द्विजः। सुरापानसमं ज्ञेयं पीत्वा चांद्रायणं चरेत्। तत्र एकहस्ते
न वामेन न पिबेदिति। स्मृतिः। मोहाद्भुंजीत यस्तत्र पंक्त्यामुच्छिष्टभोजनः। प्राय
श्चित्तं चरेद्विप्रः कृच्छ्रं सांतपनं तथा। पीतशेषं तु यत्किंचिद्भोजने मुखनिःसृतं।
अभोज्यं तद्द्विजानीयाद्भुक्त्वा चांद्रायणं चरेत्। पीतोच्छिष्टं तु पानीयं पीत्वा ब्राह्म उ ३
णः क्वचित्। त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः। समुच्छिष्टस्य योऽनुक्ते यो ७६
नुक्तेमुक्तभोजनः। एवं विवस्वतः प्राह भुक्त्वा सांतपनं चरेत्। माध्द्विकं फाणितं

यज्ञाः प्रकीर्त्तिताः स्वाध्यायो ब्रह्मयज्ञस्य दैवयज्ञोऽग्निहोमकः। भूतयज्ञो बलिः
प्रोक्तो हुतशेषान्नतस्ततः। पितृयज्ञः स्वधा पितृभ्य इत्यादिदानतः। तद्ब्राह्मं कर्म
एते पंचमहायज्ञाः नृयज्ञः शक्त्या प्रीत्या मनुष्येभ्यः अतिथिभोजननं। अथवा
हंतकारं पुष्कलं ग्रासं वा दद्यात्। ततो गोग्रासः नंदादिभ्यो गोग्रासः। तत्र मंत्रः। सौ
रभेयः सर्वहिताः पवित्राः पापनाशनाः। प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमात
रः। सौवासिन्यादिभुक्तशेषं घृताक्तं अन्नं आदाय विश्वदेवं शेषं वा बहिः श्वभ्यो न
मः इत्यादि प्रयोक्तिकाकबलिदानं कुर्यात्। पादप्रक्षालनं उदकोप आचमनं। ततः
आगतं अनागतं वा अतिथिं विलोकयेत् इति। अतिथिलक्षणमाह शांखायनः॥

निकयामीणमतिथिं विप्रो ह्यागतमेव च। उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोपि
वा। अग्निहोत्रं बली वह्नाः काले चातिथिरागताः। बालाश्चैकुलवृद्धाश्च निहइंत्य
८३ पमानिताः तथा। न पृच्छेद्गोत्रचरणे स्वाध्यायं देशजन्मनि। भिक्षवे ब्राह्मणे चान्नं
दद्यादेवाविचारयत्। अवश्यमतिथिं प्राप्तं गृहे इमे धीसमर्चीयत्। अनर्चितो व्र
जन् यात्त्या पुष्यमादाय गच्छति। चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृतां। प्रीय
तेस्वागते चाग्निः आसनेन शतक्रतुः। पितरः पादशौचेन भोजनेन प्रजापतिः। वि
प्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी। तावत्पुष्करपात्रेण पिबंति पितरोम्बुनं॥ ३१
तस्मादतिथिपूजायां यतेत सततं नरः। स केवलमघं भुंक्ते यो भुंक्ते ह्यतिथिं विना।

शाकं गोरसं लवणं घृतं। हस्तदत्तानि भुक्त्वा तु दिनमेकमभोजनं। आसनारूढ
पादो वा वस्त्रार्द्धप्रावृतोपि वा। मुखेन धमितं भुक्त्वा द्विजश्चांद्रायणं चरेत्। यश्चानि
ष्ठत्यनाचांतो भुक्त्वा वा नासनात्ततः। सद्यः स्नानं प्रकुर्वीत सवस्त्रो ब्राह्मणस्तथा। उ
च्छिष्टोच्छिष्टसंस्पृष्टो ह्यन्योन्येन द्विजेन तु। उपोष्य रजनीमेकां पंचगव्येन शुध्य
ति। करमध्ये स्थितादेवा करपृष्ठे तु राक्षसाः। तस्मात्करस्य पृष्ठेनान्नेकयत्किद
च्चिणं। अपोशानार्थमुदकं गृह्णीयादिति शेषः। अन्नं भोजनकालेतु मक्षिकाकीट
दूषिते। सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुध्यति। अनंतरं स्पृशेदापस्त्वान्ने
प्रोक्षयेज्जलैः। भोजनान्नं च निःशेषं कुर्यात्प्राज्ञः कथंचन। अन्यत्र दधिसक्तु

ज्यपलल्लत्तरमध्यपः नोच्छिष्टं कस्यचिद्द्याद्याद्याद्यस्यकथंचन। नचैवात्यशनं
कुर्यान्नचोच्छिष्टक्वचिद्व्रजेत्। भूमौपात्रंप्रतिष्ठाप्ययोभुंक्ते वाग्यतः शुचिः। भोज्ये
नभोजनेपार्थत्रिरात्रफलमश्नुते। सपवित्रौकरोयस्क भुंक्ते विप्रो विधानतः। या
सेश्रासेफलंतस्यपंचगव्यसमंभवेत्। भोजनेयशस्यं दक्षिणामुखइत्युक्तं। द
क्षिणामुखभोजनंमातुरनायुष्यमिति। आपस्तंबस्मृतिः। अतः दक्षिणामुखभो
जननिषेधस्तुजीवन्मातृविषयः। सायंप्रातर्द्विजातीनामशनंपरिकीर्तितं। नां
तराभोजनंकुर्यादग्निहोत्रसमोविधिः। आपस्तंबः। नचरितोनविजंभितोनइ ३३
सन्ननखरजस्पृष्टान्नदुष्टं नपात्रदत्त्वयनभावदुष्टं नगोब्राह्मणोपरोधेनचशकुनि

काकाद्युपहतं। नदुष्टदृष्टं नश्वडशोषं नपर्युषितं अन्यत्रशाकस्नेहमधुयवगो
रसगुडविकारेभ्यः नपादेनपात्रमुपस्पृशन्न नप्राहृतशिराः यज्ञोपवीती अन्नं
अकुत्सयन्नभुंजीत। पुनश्च। याचनंवैश्वदेवार्थंसत्यार्थंयस्यभाषितं। पुत्रार्थं
कन्यादानंचस्वर्गार्थंतस्यजीवितं। अथभोजनप्रकारः। हस्तौपादौप्रक्षाल्यद्वि
राचम्यपीठेप्राङ्मुखउपविश्यआनीतमन्नं। तिरश्चिदिंद्रोनुष्टुप्। एतोन्विंद्रमिति
शुद्धवतीभिस्त्रिस्तिसृभिः पवित्रंसोमः पवमानोनुष्टुप्। यः पावमानीरित्येतयाच
।रन्नस्थलाहृदुष्टदुर्ष्टहष्ट्यादिदोषपरिहारार्थं अन्नंप्रोक्षेत। तत्रपात्रेपरिवेषि
तमन्नं। पिबत्नुस्तोषमितिसूक्तेनस्तौति। अगस्त्योन्नंगायत्री। आयानुष्टुप्ग

गद्दितीयापंचम्यावाश्रुतिस्तोनुष्टुभः। पित्रनुस्तोषं। ऋ वोरान्नक्तिरिंद्रोनुष्टु
प्। ऋग्वा द्यौरितिमंत्रेण पीठेउपविशति। घृतवती भुवनानामिति भूमौ पात्रं नि
क्षपयति। घृतवती० स्र१। नरढान्नो त्रिर्विश्वानरस्त्रिष्टुप्। मूर्द्धानं दिव इति पात्रं अ
भिमंत्रयति। मूर्द्धानं दिवः स्र१। सत्यं त्वर्तेन परिषिंचामि इति अन्नं प्रोक्ष्य। तत
किंचिदन्नमादाय भूमौ। भूपतये नमः। भुवनपतये नमः। भूतानां पतये नमः।।
इति बलित्रयं दत्वा। अपोशानार्थं हस्ते उदकमादाय करपृष्ठेन अन्न अर्धंग्रय १८
न। वामदेव उदकं। अमृतोपस्तरणमसि स्वाहेति उदकं प्राश्य प्राणाग्निहोत्रं जु
होति। श्राद्धभोजने बलिदानं न भवति। प्राणाग्निहोत्रं न वत्येव। सूतकेपि बलिदा

प्राणाहुति पात्रधारणादयो भोजननियमा न वर्तीति स्मृत्यर्थसारे प्रतिपादितं।।
ॐकारमग्निंमहार्चिर्मूर्द्धज्वालं त्रिदैवतं। मुखे विष्णुं हृदि शिवं नाभ्यां ब्रह्माणमेव
च। इति ध्यात्वा। ऋग्वेदीनां। वामदेवः। तर्जन्यंगुष्ठाभ्यां प्राणाय स्वाहा। मध्यमांगु
ष्ठाभ्यां अपानाय स्वाहा। अनामिकांगुष्ठाभ्यां व्यानाय स्वाहा। कनिष्ठिकांगुष्ठाभ्यां
उदानाय स्वाहा। सांगुष्ठांगुलीभिः समस्ताभिः समानाय स्वाहा। इदं प्राणायेत्या
गः। दंतैरस्पृशन्। ब्रह्मग्रंथिविनिर्मुक्तं पवित्रं धारयेद्भोजनाय। भोजने वर्तु
लः। शोक इति वचनात्। ततः सांगुलीभिः सोत्तरीयं वामहस्तेन विधृतभाजनः दि
शाश्चार्थं चाणोकयवन्नानुस्यामंतरे वा कुर्वन् पंचयज्ञावशिष्टं हितं मितं समश्नं

मातृभार्यादिदत्तं कोपं अकुर्वन् भुंजीत। न भार्यया सार्द्धं भुंजीत। विवाहवर्ज्जं सं
तानस्य निर्वीर्यतादोषात्। दर्शनेपि न भुंजीत भार्यायाः अष्टौ ग्रासमुनेर्भुक्तं वा
नप्रस्थस्य षोडश। द्वात्रिंशच्च गृहस्थस्य अमितं ब्रह्मचारिणः। ग्रासान्ते च मध्ये मौ
नं प्राणाद्याः ध्यायन्नं मध्ये त्। पंचानंतरं वाग्यममात्रश्रवणात्। ॐकारोपि न दोषा
य। क्वापि वाग्यमने अपवादः। यवीयान् स पिता यश्च मुक्ता श्राद्धिकभोजनं। प्रा
णाग्निहोत्रादन्यत्र नासौ मौनं समाचरेत्। यदि भुंजीत वृक्षीडस वीत्रे वक्तु भोज ७८
ने। स पापोद्यान्तरं इति संततिं वा चिराध्रुवं। सोपि पंचाकृतौ श्राद्धे च मौनवान् भव
ति। भोजने मुखनिःसृतं। न दंतच्छेदितशेषं। न इस्तपानशेषं। न दृष्टदोषं भुंजीत।

नोच्छिष्टं कस्यचिद्दद्यात्। न मौनिरिवनेत्। न वात्यशानं। नोच्छिष्टो घृतं दधीरं च गृह्णी
यात्। आदौ विरलमधुरद्रव्यं च। मध्ये कठिणं लवणाम्लादि अंते। द्रवतिक्तकटु
ककषायं भुंजीत। पीतशेषं ग्रासशेषं चान्नोद्यं। भुक्तशेषं उच्छिष्टभागधेयेभ्यो
दद्यात्। तत्र मंत्रः। वामदेवान्नं। रौरवे पुण्यनिलये पद्मार्बुदनिवासिनां। प्राणि
नां सर्वभूतानामक्षयमुपतिष्ठतु। वामदेव आपः। अमृतापिधानमसीत्यप्र
भूपोशानं। अहं पिबतिगर्भसूषं अहं त्वन्तिभृमिषु। इत्यौ ग्रंथाव्यपवित्रको
छोटयित्वा त्यक्त्वा मौ। यदाचमनार्हमुच्छिष्टो पच्छिपेत् तेन मडीमंडलगतान्ना
गान्त्रीणाति। उच्छिष्टं प्रक्षाल्य किंचित्स्थानं परित्यज्य आसनस्थोपि आचांतःपुन

राचामेत्। विमदो ऽग्निर्विराट्। भद्रन्नो अपिवातयमनः इति। शुचिर्जलमुदकं त्रिः
पिबेत्। दक्षिणपादांगुष्ठे पाणीनिष्ठ्यूष्य निःस्रावयेत्। अंगुष्ठमात्रः पुरुषोंगुष्ठो
यं समाश्रितः। ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक्। गौरीरिति रिंडस्त्रिष्टुप्
वयः सुपर्णा इति चक्षुषी निमार्जयति। वयः सुपर्णाः त्रि॰१ तथा तांबूलभक्षणे निव
भुक्तस्नेहानुलेपने। दंतलग्नस्य संस्पर्शेनोच्छिष्टो भवति द्विजः। दंतधावनगंडू
षादिकं सन्यासिना। आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतं। उद्धृतेप्यशुचिस्ता
वद्यावन्नोन्मृज्यते मही। विश्वामित्रो ऽग्निर्विश्वानरस्त्रिष्टुप्। अग्निरस्मिजन्मनेनानि ८०
मंडलमभिमृशति। प्रगाथः सोमस्त्रिष्टुप् जगत्यौ। शंनो भवेच हृदयं च। शंनोन

क्रिसुपस्त्रय३

वेति। त्र॰१ तथा। अगस्त्यं कुंभकर्णं च शनिं च वडवानलं। आहारपरिणामार्थं
यो२ स्मरेद्भीमं च पंचमं। तत आचम्य कर्त्तव्यं तांबूलस्य च भक्षणं। इति भोजनविधिः।
आयुर्वेदे। भुक्त्वा वैत्रिमुपसंहृमय शनैः शतपदं व्रजेत्। शयीत वामभागेन त
तो रोगैर्न पीड्यते। ततः॥ ॥ पात्रोपरिस्थिते पात्रे दुरात्मा यउपस्पृशेत्। नवदपति
पितरो दत्तं नाददते सुतः॥ ॥ अहःशेषं समासीत शिष्टैरिष्टैश्च बंधुभिः। शिष्टैरि
का३ तिहासपुराणवचनैः इष्टैः स्नात्वा कथाप्रपंचचतुरैः बंधुभिरिति अनुक्तजालो
पक्रशाद्यैः आसीत मध्ये मध्ये धूपनादिर्वा। गृहकार्यं ततः कुर्यात् सायं संध्या
दिकर्म च। तथा। अनृतं मद्यगंधं च दिवा मैथुनमेव च। पुनाति वृषलस्यान्नं बहिः

संध्यामुपासिता॥ ।विद्यानागरविप्राणां। तेनास्मत्कृतः अचलेन्द्रेण। विश्वदे
वादिभोजनांतो विधिरीरितः स्वशाखाविहितस्मार्तकर्मानुष्ठानक्रमविवरणे ति ३
होमद्रव्यविश्वदेवतद्बलिवैश्वदेवयज्ञनित्यश्राद्धातिथिपूजनभोजनतत्प्र
कारविधिः अथ सायंसंध्याविधिः सायंसंध्यामुपासीत -- सदिवाकरं
शांखायनः अरण्ये समित्पाणिः संध्यामुपास्यते नित्यं वाग्यत उत्तरापराभिमु
खोऽव्यक्तदेशमानं ... नात। तथा। यत्र दिग्नियमो नास्ति क्रियमाण
स्य कर्मणः तिस्रस्तत्रैव दिशा ज्ञेया प्राचीशानी तथोत्तरा। विधिः हस्तौ पादौ प्रक्षा ८१
ल्य विधिवदाचम्य शिखां स्पृष्ट्वा करयोः कुशान् धृत्वा संध्याकरणं प्रत्यवायपरि

हारार्थं सायंसंध्यामुपास्ये इति प्रयोगः। ब्रह्मेशार्कहरीणां च संगमः संध्ययोर्द्व
योः इति पराशरवचनात्। तेभ्यो नमः। अथ प्रणवन्यासादारभ्य ओं विष्णुः इति प्रा
णायामपर्यंतं प्रातर्वत्। न्याससहितं सर्वमिति। आचमनमंत्रेण। नारायणो ऋषि
प्रकृतिः। अथवा वामदेव ऋषिः। अग्निर्मन्युमन्युपतयो देवता। प्रकृतिश्छंदः। अग्नि
श्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां। यदह्ना पापमकार्षं
मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुंपतु। यत्किंच दुरितं मयि।
इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा। पुनर्विधिवदाचम्य। ततः सा
यंसंध्याध्यानं। वामदेवः। सायंसंध्या सरस्वती वृद्धास्त्री कृष्णांगी शुक्लवाससा। गरुड

स्कंधसमारूढा शंखचक्रपद्मऽस्त्रा विष्णुदेवत्या गरुडवाऽनासामवेदमुखी
चतुरक्षरा विष्णुवादिनी। आयातु वरदे देवि चतुरक्षरे विष्णुनिर्मिते। सरस्वती छं
दसां माता विष्णुनाम्ऽआवह। आयाहि वरदे देवि चतुरक्षरे विष्णुनिर्मिते। सर
स्वती छंदसां मातर्विष्णुयोनिनमोस्तु ते। ततो मार्जनादि चतुष्क प्रक्षेपितं प्रावर्य
त्। गायत्र्यांजलित्रयमादित्याभिमुखः तिष्ठन्नूर्ध्वं क्षिपेत्। सायं उपविष्टा चेति
पक्षः। नात्र सूर्योपस्थानं। आसीनो गायत्रीं जपेदातारकोदयात्। प्रातर्नाभौ करौ न्य
वा मध्यन्दिने हृदयस्थितः। सायं मुखसमीपे तु एष न्यासविधिः स्मृतः। सायं विसर्ज ८२
नं। यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्। तत्सर्वं क्षम्यतां देवि कस्यनस्वलते

मनः। उत्तरे शिखरे जाता भूम्यां पर्वतवासिनि। विष्णुनासमनुज्ञाता गच्छ देवि यथा
सुखं। अनग्निब्रह्मचारिणो होमः अहरहः सायंप्रातरग्निमुपसमाधायेत्या
दिकः शांखायनगृह्येनुक्तः। आसीनः प्रत्यक् सायं तु वह्निकार्यं तु तत्पुनः। सायं
पश्चिमाभिमुखः आसीनो जपेद्द्विजः। साग्निकस्तु यथाविध्यग्निहोत्रं तु होति।
आहिताग्निस्तु धृते वेदन्यस्तमियात्। बहुविदा ब्राह्मणेनोद्धरणमित्यादि
शांखायनोक्तनयेन। तथा। विहारमग्नीनां हत्वा देवतास्ते त्रातिष्ठंति। अन्यथा
सूर्येण सह गच्छतीति। क्रमोऽनिपादनाच्च उद्धरणं स्वैवसंध्यामुपासीत। शां
खायनः। पुराछायानां संसर्गाद्विगार्हपत्यादाऽवनीयमुद्धरति। उद्धरणं प्राऽ

क्करणं। सायमस्तमिते पुरातमसस्तस्मिन्काले न्तु कुर्यात्। श्रौतस्मार्तं च होमं॥
ग्नाज्नाथौ विश्वदेवं कुर्यात्। प्रातर्वत्। नक्तं चरेच्च इति सायं विशेषः। प्रातस्त्वपादि
कं न भवति। यथासंभवं देवार्चनादि स्यात्। रात्रिसूक्तं च। कुशिको रात्रिर्गायत्री॥
रात्री व्यख्यदायती। सायंप्रातर्द्विजातीनामशनं परिकीर्तितं। तथा याज्ञवल्क्यः। उ
पास्य पश्चिमां संध्यां कृत्वाग्नींस्तानुपास्य च। भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ सं
विशेत्। शयनं रात्रिभोजनं इत्थिकं। इच्छया भुंक्ते। अन्नादि दधि च सक्तुं च श्रीकामो
निशि वर्जयेत्। तथा। रात्रौ भोजनकाले तु यदि दीपो विनश्यति। पाणिभ्यां पात्रमा ८३
दाय गायत्रीं मनसा स्मरेत्॥ पुनर्दीपं च नैव शेषं भुंज्याद्द्विजोत्तमः। पुनरन्नं न भो

क्ष्यं भुक्त्वा कृच्छ्रं समाचरेत्। कार्यशेषं समाप्याथ शयनं न कुर्यात्। तथा। धर्मा
र्थकामान् स्वकाले न जपयेत्। यथाशक्तिः। धर्मार्थहीनो न भवति। धर्मविनाश्च
र्थकामौ न भवत इति धर्मः सुतरां सेव्यः। तथा। इत्थं चरथ दानानि त्रियोरन्नं व
सुंधरा। प्रसारितमिदं पुत्र्यं पूनो धर्मार्थयोः फलं। अथ शयनविधिः। प्रदोषप
श्चिमौ यामौ वेदाभ्यासेन तौ नयेत्। मध्यद्वयं शयानस्तु ब्रह्मभूयाय कल्पते॥
नार्द्रपादः स्वपेन्नैव पलाशशयने तथा। पंचदारुकृते नैव न च भग्नकृते न च। ना
न्याश्रितां न कृशां नास्तु पत्नीयं। पूर्वदक्षिणशिरः स्वपेत्। न पश्चिमोत्तरशिरः। प्राक्
शिरसः शयने विद्याद्दक्षिणस्यां धनायुषी॥ पश्चिमे प्रबलां चिंतां हानि मृत्युं तथो

दि२

त्तरे। मांगल्यं पूर्णकुंभं शिरस्थाने निधापयेत्। वैदिकैर्गारुडैर्मंत्रैरक्षांस्त्वात
तःस्वपेत्। प्रक्षालितचरणःशुचिःशुचिस्थाने शय्यायां। सुत्रामाणं इ॰ये। ऋ॰।
इति शय्यारोहणं। विदिकामंत्राराचिसूक्तं। स्वप्नस्वप्नादिकरणे इति च। अथगा
रुडमंत्राः। सर्पापसर्प भद्रं ते दूरं गच्छ महाविषः। जनमेजयस्य यज्ञांते आस्ती
कवचनं स्मृणु। आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्तते। शतधा भिद्यते मूर्धा
शिंशवृक्षफलं यथा। ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अंतरिक्षे ये दि
वि तेभ्यः सर्पेभ्यो नमः। तथा। सुखशायिनो देवान्स्मरेत्। तथा। अगस्तिर्माधव ८४
श्चैव मुकुंदो महाबलः। कपिलो मुनिरास्तिकः पंचैते सुखशायिनः। अकृतं
चु

चनमस्त्वत्यसमाधिस्थः सुखं स्वपेत्। निद्रासमयमासाद्य तांबूलं मुखतस्त्य
जेत्। शिरसः पुष्पमालां च नार्यां च शयनात्यजेत्। ललाटपुंड्र- प्रज्ञां हरति
तांबूलं आयुर्हरति पुंड्रकं। सर्पाद्भयं पुष्पेभ्यः प्रमदा बलनाशनी। इति शय
नविधिः। मनुः याज्ञवल्क्यः। षोडशर्तुर्निशाः स्त्रीणां तस्मिन्युग्मासु संविशेत्।
ब्रह्मचर्येव पर्वाणि आद्यास्तास्तु विवर्जयेत्। मनुः। युग्मासु पुत्रा जायंते स्त्रियो
युग्मासु रात्रिषु। अमावास्यामष्टमींच पूर्णमासीं चतुर्दशीं। ब्रह्मचारी भवेन्नित्य
मप्यृतौ स्नातको द्विजः। त्रांखनिखितौ। न दिवा मैथुनं चरेत्। क्लीवाप्यथवा स्त्री यदि
वा प्रसूयंते। स्त्रियः शोणिताधिक्ये स्त्री स्यात्। पुमान्सोधिके भवेत्। तस्माच्छुक्रे
पुंसा

विहृद्यर्द्धं रूद्ध्यं स्निग्धं च सेवयेत्। नास्नातां तु स्त्रियं गच्छेत् नातुरां न रजस्वलां॥
नानिष्टां न प्रकुपितां नाप्रशस्तां न गर्भिणीं। क्षुत्क्षामो ऽतिवृद्धां च स्त्रियं चानि
गुणेयुतिं। गर्भिणीयामिछंत्यां न दोषः। आपस्तंबः। ऋतुगमि च चित्रांकिचात्मानं च
मैथुनं स्मृतं। अन्ततो तु सदा कार्यं शौचं मूत्रपुरीषवत्। हावेनावस्तुचेस्यातां
दंपती शयनं गतौ। शयनादुत्थिता नारी। शुचिः स्यादशुचिः पुमान्। अजाश्वमु
खतो मध्यगा वो मेध्यमक्ष्टष्यतः। ब्राह्मणः पादतो मेध्यः स्त्रियो मेध्यास्तु सर्वतः।
यतः स्पृष्टादौ प्राप्नयो वनाश्च परणीता चंद्रमसः संगतातदा चंद्रमस्तासां शौचं ८५
पावित्र्यं दत्तं। ततो देवगंधर्वैः नारदत्तुंवरादिभिः तथैव वायुनासाधुर्यं दत्तं। ततोऽ

ग्निना तथैवानंतरं सर्वकाले पवित्रत्वं दत्तं। ततो सर्वता मेध्या। न भार्यादर्शने
ऽश्नीयात् नेनामीक्षेत चाश्नतीं। क्षुवंतीं जृंभमाणां यां न चासीनां यथासुखं। तथा॥
न नग्नां स्त्रियमीक्षेत। अमांगल्यादिदोषात्। गौतमः। न मिथुनीभूय शौच
मविलंबेत्। याज्ञवल्क्यः। एवं गच्छन् स्त्रियं क्षामां मघां पौष्णं च वर्जयेत्। सु
स्थरं दुसमत्सु चं जन्मयेज्जनयेत्पुमान्। ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्ज्यं।
पराशरः। ऋतुस्नातां तु यो नार्यां संनिधौ नाधिगच्छति। घोरायां भ्रूणहत्यायां यु
ज्यते नात्र संशयः। परदारान्न गच्छेत मनसापि कदाचन। किमुवाचा स्थिबंधे च
नास्ति तेषु व्यपायिनां। मनुः। संतुष्टो भार्यया भर्त्ता भर्त्रा भार्या तथैव च। तस्मिन्ने

मत्कृत्वे नित्यं कल्याणं तत्र विश्रुवां। आचारः प्रथमो धर्मः श्रुत्युक्तः स्मार्त्त एव
च। तस्मादस्मिन्समायुक्तो नित्यं स्यादात्मवान्द्विजः। आचाराद्विच्युतो विप्रो न वे
दफलमश्नुते। आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत्। एवमाचारतो दृष्ट्वा
धर्मस्य मुनयो गतिं। सर्वस्य तपसो मूलं आचारं जगृहुः परं। सर्वलक्षणहीनो
पि सदाचारवान्नरः। श्रद्दधानोनसूयश्च शतं वर्षाणि जीवति। यंतः कद्रूरपि
तिक्तोपि सद्वर्त्तयः पुमान्न संत्यजति। स भवति स द्योवंद्यः सर्षप इव सर्वलो ८६
कस्य। अहन्यहनि विप्राणां कर्मयन्नमिशेरितं। अथ कानि वक्ष्यति यस्मादाह्निके
ताहिदुर्बुधाः। इति मंगलं। श्रीमान्मडुडाभिजने प्रसूते हहानिधने नगरे वस

चः। ऋग्वेदेनोरचलद्विवेदी निर्मीतवान्दीपकमाह्निकस्य। श्रीविक्रमार्कात्स
मयादतीते शून्येहयपंचशतात्परे च। न्योका निधने समयेज्ज निष्ठपूर्त्तिमिया
ह्निकदीपकोयं॥ इति आचलदवेक्तं आह्निकं समाप्तं॥ ॥अथ अष्टचत्वा
रिंशत्संस्काराद्विजस्य। गर्भाधनं। पुंसवनं। सीमंतं। जातकर्मनाम। अन्नदा
न। चूडा। उपनयन। खक्रिय। शाक्कर। आतिकु। अपनिषद। समावर्त्तन। विवाह
पंचमहायज्ञाः॥१८॥ पाकसंस्थाः हविःसंस्थाः सोमसंस्थास्तथापराः। एकविंशति
त्येना।२१। वेदपठनं। अन्नाशाकश्रेतं। प्रयाणसमये रामसंचादिजपनं॥ विधि
वत्प्राणोत्क्रांतिः। विधिवद्दाहः। अस्थिसंचयनं। नस्मतः सब्रूदनं च। श्राद्धानि सापि

डनं॥४८॥ अष्टचत्वारिंशदेते संस्कारविहिता द्विजे। यएतैः संस्कृता विप्रो ब्रह्म
लोकं सगछति। इति आह्निकं च। अष्टचत्वारिंश संस्कार अनुक्रमः समाप्तः॥
अनुमानग्रंथसंख्या १३२५॥ ॥तथा चैद्धमावास्या ऋतुसंक्रांत्यनंतिका। पक्षे
युगादिमन्वादि द्वेन वान्ने हिसमृति॥ द्वात्रिंशात्पिंड दानं तु शेषं संकल्प्यतो विधिः।
एदे लिंगद्वयं नार्चग णेशत्रितयं नहि। शक्तित्रयं तथा शंखं शालिग्राम द्विजं
द्वयं। द्वे चक्रे द्वारिकानाथं सूर्यद्वयं तथा। एतेषां पूजने नित्यं उद्वेगं गृहकार ८७
कं। नित्यं कष्टमवाप्नोति दारिद्र्यं मरणं ध्रुवं। शालिग्रामसमा पूज्या समे द्वि
तयं नहि। विषमेनैव पूज्यं तु विषमे घेकएव हि॥ ॥श्री॥ ॥अर्हं केशीविरु

पात्री नित्यमांसभोजने। तिष्ठ देवि शिखाबंधे चामुंडे चापराजिते। ब्रह्मचा
री सहस्राणि रुद्रकोटिशतानि च। विष्णोर्नाम सहस्राणि शिखाबंधं करोम्यहं॥
बुंगाना ------ चमे वज्रगतः पिता। याचिते देहि मे तीर्थैः सर्वपापैः प्रमुच्य
ते॥ ॥शुभंभवतु॥ ॥कल्याणमस्तु॥ ॥संवत् १७८३ वर्षे श्रावणमासे कृ
ष्णपक्षे अमावास्या भृगौ दिने अद्येह श्रीसूर्यपुरवास्तव्यं आभ्यंतर नागर
ज्ञातीय दवे हरिकृष्ण सुत दवे गणेशजी नाम्ना लिखितं इदं अचंदवेष्टतं ८८
आह्निकं संपूर्णं॥ ॥स्वस्य अवलोकनार्थं॥ ॥स्वकीयं पुस्तकं॥ ॥छ॥॥
॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥

